कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M-2693

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
अध्यात्मरामायण अरण्यकांड		~~धार्मिक~~ पुराण	पूर्ण		5/12	68	संस्कृत	कागद	12	48		

अध्यात्मरामायणप्रारंभः श्रा०

प्राहतत्र रघुश्रेष्ठं राम रामसुराश्रय ॥३

अ० रा० आ०
१

श्रीगणेशाय नमः ॥ अथेति दिनं दिनशेषं ॥१॥ यत्र दंडकं विपिनं मुनिमंडलमंडितं तत्र गच्छामहे त्वमाज्ञातुं छताज्ञं कर्त्तुं ॥२

श्रीमहादेव उवाच ॥

श्रीगणेशाय नमः ॥ अथ तत्र दिनं स्थित्वा प्रभाते रघुनंदनः ॥ स्नात्वा मुनिं समामंत्र्य प्रयाणायोपचक्रमे ॥१॥ मुने गच्छामहे सर्वे मुनिमंडलमंडितं ॥ विपिनं दंडकं यत्र त्वमाज्ञातुमिहार्हसि ॥२॥ मार्गप्रदर्शनार्थाय शिष्यानाज्ञप्तुमर्हसि ॥ श्रुत्वा रामस्य वचनं प्रहस्यात्रिर्महायशाः ॥३॥ सर्वस्य मार्गद्रष्टा त्वं तव को मार्गदर्शकः ॥ तथापि दर्शयिष्यंति तव लोकानुसारिणः ॥४॥ इति शिष्यान्समादिश्य स्वयं किंचित्तमन्वगात् ॥ रामेण वारितः प्रीत्या अत्रिः स्वभवनं ययौ ॥५॥ क्रोशमात्रं ततो गत्वा ददर्श महतीं नदीं ॥ अत्रेः शिष्यानुवाचेदं रामो राजीवलोचनः ॥६॥ नद्याः संतरणे कश्चिदुपायो विद्यते न वा ॥ ऊचुस्ते विद्यते नौका सुदृढा रघुनंदन ॥७॥ तारयिष्यामहे युष्मान्वयमेव क्षणादिह ॥ ततो नावि समारोप्य सीतां राघवलक्ष्मणौ ॥८॥ क्षणात्संतारयामासुर्नदीं मुनिकुमारकाः ॥ रामाभिवंदिताः सर्वे जग्मुरत्रेरथाश्रमं ॥९॥ तावेव विपिनं घोरं झिल्लीझंकारनादितं ॥ नानामृगगणाकीर्णं सिंहव्याघ्रादिभीषणं ॥१०॥

३॥ मार्गद्रष्टा मार्गदर्शयिता ॥ लोकानुसारिणः लोकवद्वृत्तं नाटयतः ॥४॥ वारितः निवर्त्तध्वमिति प्रार्थितः ॥५॥६
७॥८॥ रामाभिनंदिताः रामेणानंदपूर्वकं गच्छतेति दत्तानुमतयः ॥९॥ झिल्लीझंकारो झिल्लीशब्दः ॥१०॥

राम०
१

११ सहितेन युवाभ्यां मिलितेन गंतव्यमित्युक्तेति शेषः दधत् अदधदित्यर्थः ॥१२॥ साहित्यमकारमेवाहाग्ने हाग्नेइति आत्मनो
र्जीवघ्नयोर्मध्यगा आत्मत्वविषयत्वाभ्यां संबद्धामायेवेत्यर्थः ॥१३॥ दृष्टं अपशकुध्नैः सूचितं तनुत्राकुंनादिषु कोवि
द्वासस्तत्राह ॥ श्रुतपूर्वमिति दंडकारण्ये पूर्वं ऋषीणां मुखात् श्रुतं रक्षोभयं विद्यते शाकुनैश्च तन्निश्चितमित्यर्थः ॥१४॥

एह्सैर्घोररूपैश्च सेवितंरोमहर्षणं ॥ प्रविश्य विपिनं घोरं रामो लक्ष्मणमब्रवीत् ॥११॥ इतः परं प्रय
त्नेन गंतव्यं सहितेन मे ॥ धनुर्गुणेन संयोज्य प्राणानपि करे दधत् ॥१२॥ अग्रे यास्याम्यहं पश्चात्त्वमन्वे
हि धनुर्धरः ॥ आवयोर्मध्यगा सीता मायेवात्मपरात्मनोः ॥१३॥ चक्षुश्चारय सर्वत्र दृष्टं रक्षोभयं म
हत् ॥ विद्यते दंडकारण्ये श्रुतपूर्वमरिंदम ॥१४॥ इत्येवं भाषमाणौ तौ जग्मतुः सार्धयोजनं ॥ तत्रैका
पुष्करिण्यास्ते कल्हारकुमुदोत्पलैः ॥१५॥ अंबुजैः शीतलोदेन शोभमाना महद्दृश्यत ॥ तत्समीपम
थोगत्वा पीत्वा तत्सलिलं शुभं ॥१६॥ ऊचुस्ते सलिलाभ्याशे वृक्षेणछायामुपाश्रिताः ॥ ततो ददृशुरण्यां
तं महासत्वं भयानकं ॥१७॥ करालदंष्ट्रवदनं भीषयंतं स्वगर्जितैः ॥ वामांसेन्यस्तशूलाग्रग्रथिता
नेकमानुषं ॥१८॥

॥ कल्हारशीतोदकादियुक्ता एका पुष्करिणी तत्रास्ते ॥१५॥ साशोभमाना तैर्महद्दृश्यतेइत्यर्थः ॥१६॥
महासत्वं महाशरीरं प्राणि ॥१७॥ करालदंष्ट्रायुतं वदनं यस्य तत् ॥ वामो सैवामस्कंधे न्यस्ताः ॥ शूलाग्रे ग्रथिता अनेकमा
नुषा येन तत् ॥१८॥ ॥

गजव्याघ्रमहीषमिति समाहारद्वंद्वः ॥ ज्या आरोपिता यस्मिन् तत् ॥१९॥ अग्रे संमुखदेशे वर्त्तमानोऽस्मदभिमुखमायाति भीरू
णां भयमावहन्नित्यनेननास्माकं भयमिति ध्वनितं ॥२०॥ अचल इव रामः स्थित इत्यन्वयः ॥२१॥२२॥ २३ वक्त्रं प्रवि

भक्षयंतं गजव्याघ्रमहिषं वनगोचरं ॥ ज्यारोपितं धनुर्धृत्वा रामो लक्ष्मणमब्रवीत् ॥१९॥ पश्य भ्रा
तर्महाकायो राक्षसोयमुपागतः ॥ आयात्यभिमुखं नोग्रे भीरूणां भयमावहन् ॥२०॥ सज्जीकृतध
नुस्तिष्ठ मा भैर्जनकनंदिनि ॥ इत्युक्त्वा बाणमादाय स्थितो रामइवाचलः ॥२१॥ स तु दृष्ट्वा रमानाथं
लक्ष्मणं जानकीं तदा ॥ अट्टहासं ततः कृत्वा भीषयन्निदमब्रवीत् ॥२२॥ कौ युवां बाणतूणीरजटा
वल्कलधारिणौ ॥ मुनिवेषधरौ बालौ स्त्रीसहायौ सुदुर्मदौ ॥२३॥ सुंदरं वतमे वक्त्रं प्रविष्टकवलोप
मौ ॥ किमर्थमागतौ घोरं वनं व्यालनिषेवितं ॥२४॥ श्रुत्वा रक्षोवचो रामः स्मयमान उवाच तं ॥ अ
हं रामस्त्वयं भ्राता लक्ष्मणो मम संमतः ॥२५॥ एषा सीता मम प्राणवल्लभा वयमागताः ॥ पितृवाक्यं
पुरस्कृत्य शिक्षणार्थं भवादृशां ॥२६॥ श्रुत्वा तद्रामवचनमट्टहासमथाकरोत् ॥ व्यादाय वक्त्रं बा
हुभ्यां शूलमादाय सत्वरं ॥२७ मां न जानासि राम त्वं विराधं लोकविश्रुतं ॥ मद्भयान्मुनयः सर्वे
((त्यक्त्वा वनमितो गताः ॥२८॥ ॥

ष्टकवलोपमा विसनेन सुकरवधत्वं ध्वनयति ॥ व्याला दुष्टा हिंस्रजीवाः ॥२४॥
२५॥ २६॥ २७॥ २८॥ राम राम राम ॥ ॥

जीवितुमिच्छास्ति युवयोरिति शेषः शीघ्रं पलायतं न चेद्भक्षयामीत्यर्थः ॥२९॥३०॥३१॥३२॥ सर्पइवेति उरसैवेति भावः ॥३३॥ रु

यदि जीवितुमिच्छास्ति त्यक्त्वा सीतां निरायुधौ ॥ पलायतं न चेच्छीघ्रं भक्षयामि युवामहं ॥२८॥ इत्युक्त्वा
राक्षसः सीतामादातुमभिदुद्रुवे ॥३०॥ रामश्चिच्छेद तद्बाहू शरेण सह सन्निव ॥ ततः क्रोधपरीतात्मा व्या
दाय विकटं मुखं ॥३१॥ राममभ्यद्रवद्रामश्चिच्छेद परिधावतः ॥ पदद्वयं विराधस्य तदद्भुतमिवाभवत्
॥३२॥ ततः सर्पइवास्येन ग्रसितुं राममापतत् ॥ ततोर्धचंद्राकारेण बाणेनास्य महच्छिरः ॥३३॥ चि २३
च्छेद रुधिरौघेण पपात धरणीतले ॥ ततः सीता समालिंग्य प्रशशंस रघूत्तमं ॥३४॥ ततो दुंदुभयो नेदुर्दि
वि देवगणेरिताः ॥ ननृतुश्चाप्सरो हृष्टा जगुर्गंधर्वकिंनराः ॥३५॥ विराधकायादतिसुंदराकृतिर्वि
भ्राजमानो विमलांबरावृतः ॥ प्रतप्तचामीकरचारुभूषणो व्यदृश्यताग्रे गगने रविर्यथा ॥३६॥ प्र
णम्य रामं प्रणतार्तिहारिणं भवप्रवाहोपरमं घृणाकरं ॥ प्रणम्य भूयः प्रणनाम दंडवत् प्रपन्न
सर्वार्तिहरं प्रसन्नधीः ॥३७॥

धिरौघेण सह तच्छिरो भूतले पपातेत्यन्वयः ॥३४॥ विराधकायान्निःसृत इति शेषः । विमलांबरं निर्मलवस्त्रं तेनावृतः चा

रा० अ० आ०
३

मीकरं सुवर्णं ॥३६॥ भवप्रवाहस्य संसारप्रवाहस्योपरमो नाशो यस्मात्तद्घ्रणापादयायाः आकारमुत्पत्तिस्थानं प्रपन्नानां
शरणागतानां सर्वपीडोंघ्राकं ॥३७॥ राजीवं कमलं अकारणकोपमूर्त्तिनानिमित्तकोपवन्मूर्त्तिना ॥३८॥ मे कर्णपुटं त्वदीयंक
रना

॥विराधउवाच॥ श्रीराम राजीवदलायताक्ष विद्याधरोहं विमलप्रकाशः ॥ दुर्वाससाऽकारणको
पमूर्त्तिना शप्तः पुरा सोद्य विमोचितस्त्वया ॥३८॥ इतःपरं त्वच्चरणारविंदयोः स्मृतिः सदा मेस्तु भवो
पशांतये ॥ त्वन्नामसंकीर्त्तनमेव वाणी करोतु मे कर्णपुटं त्वदीयं ॥३९॥ कथामृतं पातु करद्वयं ते पादा
रविंदार्चनमेव कुर्यात् ॥ शिरश्च ते पादयुगप्रणामं करोतु नित्यं भवदीयमेवं ॥४०॥ नमस्तुभ्यं भगवते
विशुद्धज्ञानमूर्त्तये ॥ आत्मारामाय रामाय सीतारामाय वेधसे ॥४१॥ प्रपन्नं पाहि मां राम यास्यामित्व
दनुज्ञया ॥ देवलोकं रघुश्रेष्ठ माया मां मावृणोतु ते ॥४२॥ इति विज्ञापितस्तेन प्रसन्नो रघुनंदनः ॥
ददौ वरं तदा प्रीतो विराधाय महामतिः ॥४३॥ गच्छ विद्याधराशेषमायादोषगुणा जिताः ॥ त्वया म
द्दर्शनात्सद्यो मुक्तो ज्ञानवतां वरः ॥४४॥ मद्भक्तिर्दुर्लभा लोके जाताच्चेन्मुक्तिदा यतः ॥ अतस्त्वंभ
क्तिसंपन्नः परं याहि ममाज्ञया ॥४५॥

॥ थामृतं पातु इत्यन्वयः पिबत्वित्यर्थः सादरं श्रवणे त्वित्यर्थः पिबादेशा
भावः आर्षः ॥३९॥ एवं मदंगजातं सर्वं भवदीयमेवास्तु भवत्सेवापरमेवास्त्वित्यर्थः ॥४०॥ आत्मनि स्वस्वरूपे आर
मते तस्मै सर्वदात्तद्नुसंधानवते इत्यर्थः ॥४१॥ इदानीं प्रार्थयते मायेत्यादि ॥४२॥ ४३॥ अशेषा मायादोषरूपलोकेगुणास्त

वेन लोके प्रसिद्धास्त्वया मद्दर्शनाज्जिताः अपरं
ज्ञानवतां वरो भूत्वा मुक्तो भविष्यसीति शे
षः ॥४४॥ परं मोक्षं याहि प्राप्नुहि ॥४५॥

रा०
३

रामेण रक्षोनिधनकृतं तेन निधनेन तस्य रक्षसः शापाद्विमुक्तिः कृता तस्मै एवं वरदानं च कृतं यतस्तेन पुनरेव विद्याधरत्वं ल
ब्धं अतो रामं गृणन्नरो खिलार्थानेति प्राप्नोति ॥४६॥ इति श्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिविरुदावलीविराज
मानस्य हिम्मतिवर्मणः पुत्रस्य श्री रामवर्मकृतावध्यात्मरामायणसेतौ आरण्यकांडे प्रथमसर्गः ॥१॥ विराधे इति रण ३

रामेण रक्षोनिधनं सुघोरं शापाद्विमुक्तिर्वरदानमेवं ॥ विद्याधरत्वं पुनरेव लब्धं रामं गृणन्नेति
नरो खिलार्थान् ॥४६॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे आरण्यकांडे प्रथमः सर्गः १
श्रीमहादेव उवाच ३ ॥ विराधे स्वर्गते रामो लक्ष्मणेन च सीतया ॥ जगाम शरभंगस्य वनं सर्वसुखावहं ॥१॥ शरभंगस्ततो
दृष्ट्वा रामं सौमित्रिणा सह ॥ आयातं सीतया सार्धं संभ्रमादुत्थितः सुधीः ॥२॥ अभिगम्य सुसंपूज्य
विष्टरेषूपवेशयत ॥ आतिथ्यमकरोत्तेषां कंदमूलफलादिभिः ॥३॥ प्रीत्याह शरभंगोपि रामं भ
क्तपरायणं ॥ बहुकालमिहैवासं तपसे कृतनिश्चयः ॥४॥ तव संदर्शनाकांक्षी राम त्वं परमेश्वरः ॥
अद्य मत्तपसा सिद्धं यत्पुण्यं बहु विद्यते ॥ तत्सर्वं तव दास्यामि ततो मुक्तिं व्रजाम्यहं ॥५॥

॥१॥ आयातं आ
गतं ॥२॥ अभिगम्य संमुखगमनपूर्वकं तमानीय उपवेशयत अडभावश्चार्षः ॥३॥ आसंस्थितः तपसे तपः कर्तुं कृतनि
श्चयः ॥४॥ तव संदर्शनाकांक्षी इहैवासमिति पूर्वेणान्वयः यतस्त्वं परमेश्वरः मोक्षदः ॥५॥ राम ॥ राम ॥ राम ॥ राम

रा॰ अ॰ आ॰
४

विरक्तः सन् शोभनं पुण्यं हि संसारहितत्वात् तपस्तत्फलं रामस्य समर्प्य दत्वा सहसा तत्क्षणमेव चितिं समारोहयत ॥ समारुह्य तत्र निहित
प्रेषणाग्निचू ॥ ६ ॥ अशेषहृत्स्थं सर्वान्तर्यामिणं सह लक्ष्मणं समस्तदेवैः पि वोपसर्जनस्येति सादृश्याभावः ॥ ७ ॥ स्मृतकामधेनुः

समर्प्य रामस्य महत्सुपुण्यं फलं विरक्तः शरभंगयोगी ॥ चितिं समारोहयदप्रमेयं रामं ससीतं सहसा प्रणम्य ॥ ६ ॥ ध्यायंश्चि[illegible]रं राममशेषहृत्स्थं दूर्वादलश्यामलमंबुजाक्षं ॥ चीरांबरं स्निग्धजटाकलापं सीतासहायं सहलक्ष्मणं तं ॥ ७ ॥ को वा दयालुः स्मृतकामधेनुरन्यो जगत्यां रघुनायकादहो ॥ स्मृतो मया नित्यमनन्यभाजा ज्ञात्वा स्मृतिं मे स्वयमेव यातः ॥ ८ ॥ पश्यत्विदानीं देवेशो रा[illegible]मो दाशरथिः प्रभुः ॥ दग्ध्वा स्वदेहं गच्छामि ब्रह्मलोकमकल्मषः ॥ ९ ॥ अयोध्याधिपतिर्मेऽस्तु हृदये राघवः सदा ॥ यद्वामांके स्थिता सीता मेघस्येव तडिल्लता ॥ १० ॥ इति रामं चिरं ध्यात्वा दृष्ट्वा च पुरतः स्थितं ॥ प्रज्वाल्य सहसा वह्निं दग्ध्वा पंचात्मकं वपुः ॥ ११ ॥ दिव्यदेहधरः साक्षाद्ययौ लोकपतेः पदं ततो मुनिगणाः सर्वे दंडकारण्यवासिनः ॥ आजग्मू राघवं द्रष्टुं शरभंगनिवेशनं ॥ १२ ॥ दृष्ट्वा मुनिसमूहं तं जानकीरामलक्ष्मणाः ॥ प्रणेमुः सहसा भूमौ मायामानु[illegible]षरूपिणः ॥ १३ ॥

॥ स्मृतः सन् कामधेनुस्तत्तुल्यः सर्वमनोरथपूरकत्वात् यातः आगतः ॥ ८ ॥ ब्र
ह्मलोकं उपासकत्वान्मोक्षद्वारभूतं ॥ १० ॥ पुरतः स्थितं दृष्ट्वा तादृशमेव हृदये ध्यात्वा च ॥ ११ ॥ लोकपतेः कार्यब्रह्मणः हिरण्यग
र्भस्य शरभंगनिवेशनं तदाश्रमम् आजग्मुरित्यन्वयः ॥ १२ ॥
भूमौ दंडवत्पतिताः प्रणेमुः ॥ १३ ॥

रा॰
४

१४ ॥ लक्ष्मणं शेषांशमित्यन्वयः ॥ १५ ॥ अतुः भूमिदुःखहरणार्थमवतीर्णत्वात् आदौ खरादिवधेनास्माद्दुःखं मोक्तुमर्हसि १६
सुमित्रासुतजानकीभ्यां सह वनानि द्रष्टुमागछतदा तद्दर्शने सति १७ १८ अस्थिभूतानि अतिशुष्काणि १९ २० समा

आशीर्भिरभिनंद्याथ रामं सर्वहृदिस्थितं ऊचुः प्रांजलयः सर्वे धनुर्बाणधरं हरिं १४ भूमेर्भारावता
राय जातोसि ब्रह्मणार्थितः जानीमस्त्वां हरिं लक्ष्मीं जानकीं लक्ष्मणं तथा १५ शेषांशं शंखचक्रे द्वे
भरतं सानुजं तथा अतस्त्वादौ ऋषीणां त्वं दुःखं मोक्तुमिहार्हसि १६ आगच्छ यामो मुनिसेवितानि
वनानि सर्वाणि रघूत्तम क्रमात् द्रष्टुं सुमित्रासुतजानकीभ्यां तदा दयास्मासु दृढा भविष्यति १७
इति विज्ञापितो रामः कृतांजलिपुटैर्विभुः जगाम मुनिभिः सार्धं द्रष्टुं मुनिवनानि सः १८ ददर्श तत्र
पतितान्यनेकानि शिरांसि सः अस्थिभूतानि सर्वत्र रामो वचनमब्रवीत् १९ अस्थीनि केषामेता
नि किमर्थं पतितानि वै तमूचुर्मुनयो राम ऋषीणां मस्तकानि हि २० राक्षसैर्भक्षितानीश प्रमत्तानां
समाधितः अंतरायं मुनीनां ते पश्यंतोनुचरंति हि २१ श्रुत्वा वाक्यं मुनीनां स भयदैन्यसमन्वितं प्र
तिज्ञामकरोद्रामो वधायाशेषरक्षसां २२ पूज्यमानः सदा तत्र मुनिभिर्वनवासिभिः जानक्या सहितो
रामो लक्ष्मणेन समन्वितः २३

॥ धितः समाधिना प्रमत्तानां तद्दर्शने पलायनाद्यसमर्थानां अंतरायं समाधि
रूपे अप्रायत्वमिति पाठे समाधितः प्रमत्तानां हीनानां त्यक्तसमाधीनामित्यर्थः अथापसं समाधित्यागरूपं समाधौ हि भग
वदेकरूपत्वाद्रक्षांसि नास्कंदंतीति भावः २१ २२ २३ ॥

रा०अ०श्री०
५

२४ ॥ सर्वैर्ऋतुगुणैः संपन्नत्वादेव सर्वकाले सुखजनकं ॥ २५ ॥ भक्त्या प्रेम्णा उत्कंठिते रामस्य पुनः पुनर्दर्शनेच्छावती लोचने यस्य सः ॥ २६ ॥ हे भिराम परम सुंदर राम त्वन्मंत्रजापी अहं सततं तव दासदासो भूयामिति शेषः ॥ अप्रमेय देशकालापरिछेद्य शिवब्रह्मसमाश्रितचरण समुद्रतरणेऽप्लवयोपरूपौ पादौ यस्य त्वच्चरणाश्रितानां संसारसागरोत्तरणमवि

उवास कतिचित्तत्र वर्षाणि रघुनंदनः ॥ एवं क्रमेण संपश्यन्नृषीणामाश्रमान् विभुः ॥ २४ ॥ सुतीक्ष्णस्याश्रमं प्रागात्प्रख्यातं मुनिसंकुलं ॥ सर्वर्त्तुगुणसंपन्नं सर्वकालसुखावहं ॥ २५ ॥ राममागतमाकर्ण्य सुतीक्ष्णः स्वयमागतः ॥ अगस्तिशिष्यो रामस्य मंत्रोपासनतत्परः ॥ विधिवत्पूजयामास भक्त्युत्कंठितलोचनः ॥ २६ ॥ सुतीक्ष्ण उवाच ॥ त्वन्मंत्रजाप्यहमनंतगुणाप्रमेय सीतापते शिवविरिंचिसमाश्रितांघ्रे ॥ संसारसिंधुतरणामलपोतपाद रामाभिराम सततं तव दासदासः ॥ २७ ॥ मामघसर्वजगतामविगोचरस्त्वं त्वन्मायया सुतकलत्रगृहांधकूपे ॥ मग्नं निरीक्ष्य मलमूत्रपिंडमोहपाशानुबद्धहृदयं स्वयमागतोसि ॥ २८ ॥ त्वं सर्वभूतहृदयेषु कृतालयोपि त्वन्मंत्रजाप्यविमुखेषु तनोषि मायां त्वन्मंत्रसाधनपरेष्वपयाति माया सेवानुरूपफलदोसि यथा महीपः ॥ २९ ॥

१८

॥ चित्करमेवेतिभावः ॥ २७ ॥ सर्वजगतामगोचरोपि त्वं मलमुतोयः मुर्ॐपिंडः शरीरं तत्र यो मोहः ॥ अहं गौर इत्याद्यहंताबुद्धिस्तद्रूपपाशेनानुबद्धं चित्तं यस्य तं मां अघ त्वन्मायया सुतकलत्रगृहरूपांधकूपे निमग्नं निरीक्ष्य स्वयमागतोसि स्वाश्रयं

तेकरूणावत्स मिलाशयः ॥ २८ ॥ जाप्यं जपस्तद्विमुखेषु यथा महीपो राजा सेवानुरूपफलदस्तथा त्वमसीत्यर्थः ॥ २९ ॥
१८

राम० ५

विश्वस्य स्थित्यादिहेतुस्त्वमेक एव त्रिगुणया मायया उपाधिभूतया त्वमेव विधिरिति ईशः शिव इति विष्णुरिति भासीत्यन्वयः वि
वधाकृतित्वं तत्तद्व्याख्यानादौ प्रसिद्धमेव तेषां तथात्वं तत्त्वेदमनेकत्वं तव मिथ्योः वे साहयदिति ॥३०॥ तमसः परतः तद्वी
नेशुद्धसत्वप्रधानचित्ते स्थितस्येत्यर्थः दृग्रूपस्य द्रष्टेरित्यर्थः सार्वविभक्तिकस्तसिः प्रसन्नः दृग्विषयः भवसीति शे

विश्वस्य सृष्टिलयसंस्थितिहेतुरेकस्त्वं मायया त्रिगुणया विधिरीशविष्णू ॥ भासीश मोहितधि
यां विविधाकृतिस्त्वं यद्वद्रविः सलिलपात्रगतो ह्यनेकः ॥३०॥ प्रत्यक्षतोद्य भगवतश्चरणारविंदं प
श्यामि राम तमसः परतः स्थितस्य ॥ दृग्रूपतस्त्वमसतामविगोचरोपि त्वन्मंत्रपूतहृदयेषु
सदा प्रसन्नः ॥३१॥ पश्यामि राम तव रूपमरूपिणोपि मायाविडंबनकृतं सुमनुष्यवेषं ॥ कंदर्पको
टिसुभगं कमनीयचापबाणं दयार्द्रहृदयं स्मितचारुवक्त्रं ॥३२॥ सीतासमेतमजिनांबरमप्रधृ
ष्यं सौमित्रिणा नियतसेवितपादपद्मं ॥ नीलोत्पलद्युतिमनंतगुणं प्रशांतं मद्भागधेयमनिशं
प्रणमामि रामं ॥३३॥ जानंतु राम तव रूपमशेषदेशकालाद्युपाधिरहितं घनचित्प्रकाशं ॥ प्रत्यक्षतोद्य
मम गोचरमेतदेव रूपं विभातु हृदये न परं विकांक्षे ॥३४॥

॥षः ॥३१॥ अरूपिणः अरूपस्यापि छांदसः इतिः ॥ मायाविडंबनेन मा
याव्यवहारेण कृतं स्यष्टन्यमेतत् ॥३२॥ नियतसेवितेति नियमेन सेवितेत्यर्थः मद्भागधेयं मददृष्टादधशरीमिति यावत् अने
नेशशरीराणां परादृष्टमात्रजगत्वं सूचितं ॥३३॥ जानंतु अन्ये योगिन इति शेषः ॥ देशेत्यादि देशकालाद्यपरिच्छिन्नमित्यर्थः

घनेति चैतन्यमात्ररूपमित्यर्थः प्रत्यक्षत इति मम तु प
रिदृश्यमानेत्रैव भातिर्न तु परे वाङ्मनसागोचरे इत्यर्थः
॥३४॥

रा० अ० आ०
६

३५ मदृते मद्भक्तिं विनेत्यर्थः नान्यसाधनं नान्यत्साधनमित्यर्थः तनोपास्यं दस्यः तदेवाहमन्मंत्रेत्यादिना ॥ ३६ ॥ ३७ ॥ तस्य मे मयि स
द्भक्तिः सीताभक्तिर्भवेत् ॥ ३८ ॥ ३९ ॥ चिराद्दृष्टो मया प्रीतिविषयः ॥ ४० ॥ अगस्त्यसंभाषणे लोलमत्युत्कटेच्छावन्मानसं य

इत्येवं स्तुवतस्तस्य रामः सस्मितमब्रवीत् ॥ मुने जानामि ते चित्तं निर्मलं मदुपासनात् ॥ ३५ ॥ अतो
हमागतो द्रष्टुं मदृते नान्यसाधनं ॥ मन्मंत्रोपासका लोके मामेव शरणं गताः ॥ ३६ ॥ निरपेक्षा नान्यग
तास्तेषां दृश्योहमन्वहं ॥ स्तोत्रमेतत्पठेद्यस्तु त्वत्कृतं मत्प्रियं सदा ॥ ३७ ॥ सद्भक्तिर्मे भवेत्तस्य ज्ञानं
च विमलं भवेत् ॥ त्वं ममोपासनादेव विमुक्तोसीह सर्वतः ॥ ३८ ॥ देहांते मम सायुज्यं लप्स्यसे नात्र सं
शयः ॥ गुरुं ते द्रष्टुमिच्छामि ह्यगस्त्यं मुनिनायकं ॥ किंचित्कालं तत्र वस्तुं मनो मे त्वरयत्यलं ॥ ३९ ॥ सु
तीक्ष्णोपि तथेत्याह श्वो गमिष्यसि राघव ॥ अहमप्यागमिष्यामि चिराद्दृष्टो महामुनिः ॥ ४० ॥ अथ
प्रभाते मुनिना समेतो रामः ससीतः सहलक्ष्मणेन ॥ अगस्त्यसंभाषणलोलमानसः शनैरगस्त्या
नुजमंदिरं ययौ ॥ ४१ ॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे आरण्यकांडे द्वितीयः
सर्गः ॥ २ ॥ अथ रामः सुतीक्ष्णेन जानक्या लक्ष्मणेन च ॥ अगस्त्यस्यानुजस्थानं मध्याह्ने समप
द्यत ॥ १ ॥ तेन संपूजितः सम्यक् भुक्त्वा मूलफलादिकं ॥ परेद्युः प्रातरुत्थाय जग्मुस्तेगस्त्यमंडलं ॥ २ ॥

१ श्रीमहादेव उवाच ॥

स्य स इत्यर्थः ॥ ४१ ॥ इति श्रीमत्सकलराज० श्रीरामवर्मणः कृता० आर० द्वितीयसर्गः ॥ २ ॥ अथेति अगस्त्यानुजोऽग्निजिह्वना

माक्रषिः ॥ १ ॥ अगस्त्यमंडलं तदाश्रमं ॥ २ ॥

राम०
६

३ देवर्षिभिरिति छंदोभंगश्चार्षः मुनिमंदिरैः सर्वतोलंकृतमित्यन्वयः ॥३॥४॥५॥ व्याख्यातो राममंत्रार्थो येन तं प्रययौ मुनेः

सर्वर्तुफलपुष्पाढ्यं नानामृगगणैर्युतं ॥ पक्षिसंघैश्च विविधैर्नादितं नंदनोपमं ॥३॥ ब्रह्मर्षिभि
र्देवर्षिभिः सेवितं मुनिमंदिरैः ॥ सर्वतो लंकृतं साक्षाद्ब्रह्मलोकमिवापरं ॥४॥ बहिरेवाश्रमस्याथ स्थि
त्वा रामो ब्रवीन्मुनिं ॥ सुतीक्ष्ण गच्छ त्वं शीघ्रमागतं मां निवेदय ॥४॥ अगस्त्यमुनिवर्याय सीतया लक्ष्म
णेन च ॥ महाप्रसाद इत्युक्त्वा सुतीक्ष्णः प्रययौ गुरोः ॥५॥ आश्रमं त्वरया तत्र ऋषिसंघसमावृ
तं ॥ उपविष्टं रामभक्तैर्विशेषेण समायुतं ॥६॥ व्याख्यातराममंत्रार्थं शिष्येभ्यश्चातिभक्तितः ॥ दृ
ष्ट्वागस्त्यं मुनिश्रेष्ठं सुतीक्ष्णः प्रययौ मुनेः ॥७॥ दंडवत्प्रणिपत्याह विनयावनतः सुधीः ॥ रामो दा
शरथिर्ब्रह्मन्सीतया लक्ष्मणेन च ॥ आगतो दर्शनार्थं ते बहिस्तिष्ठति सांजलिः ॥८॥ अगस्त्य उ॰
शीघ्रमानय भद्रं ते रामं मम हृदि स्थितं ॥ तमेव ध्यायमानो हं कांक्षमाणोत्र संस्थितः ॥९॥ इत्युक्त्वा
स्वयमुत्थाय मुनिभिः सहितो द्रुतं ॥ अभ्यगात्त्वरया भक्त्या गत्वा राममथाब्रवीत् ॥१०॥ आगच्छ राम
भद्रं ते दिष्ट्या ते द्य समागमः ॥ प्रियातिथिर्मम प्राप्तो द्य मे सफलं दिनं ॥११॥ रामो पि मुनिमायांतं दृ
ष्ट्वा हर्षसमाकुलः ॥ सीतया लक्ष्मणेनापि दंडवत्पतितो भुवि ॥१२॥

६ समीपमिति शेषः ॥७॥ कांक्षमाणः तमेवे
त्यनुकर्षः ॥८॥९॥१०॥११॥ सीतयेत्यादेः सहेति शेषः ॥१२॥ राम राम ॥

ए० अ० आ०
७

मद्गात्रस्पर्शजाह्लादेन स्रवदश्रुनेत्रजालं तेनाकुलः ॥१३॥ रघुनंदनं दनस्ये सपर्यः ॥१४॥ वन्यैर्भोज्यैर्भोजयस्येत्यन्वयः १५ १६
१७॥ हे राम त्वद्दर्शनाकांक्षी तपश्चरन्तदादितकालमारभ्य वसामीत्यन्वयः ॥१८॥ अथ भगवत्स्वरूपं शिष्यान्बोधयितुमन्यथा

कृतमुत्थाप्य मुनिराट् राममालिंग्य भक्तितः ॥ तद्गात्रस्पर्शजाह्लादस्रवन्नेत्रजलाकुलः ॥१३॥ गृहीत्वा करमेकेन करेण रघुनंदनं ॥ जगाम स्वाश्रमं हृष्टो मनसा मुनिपुंगवः ॥१४॥ सुखोपविष्टं संपूज्य पूजया बहुविस्तरं ॥ भोजयित्वा यथान्यायं भोज्यैर्वन्यैरनेकधा ॥१५॥ सुखोपविष्टमेकांते राममं शशिनिभाननं ॥ कृतांजलिरुवाचेदमगस्त्यो भगवानृषिः ॥१६॥ त्वदागमनमेवाहं प्रतीक्षन्समवस्थितः ॥ यदा क्षीरसमुद्रांते ब्रह्मणा प्रार्थितः पुरा ॥१७॥ भूमेर्भारापनुत्तये रावणस्य वधाय च ॥ तदादि दर्शनाकांक्षी तव राम तपश्चरन् ॥ वसामि मुनिभिः सार्धं त्वामेव परिचिंतयन् ॥१८॥ सृष्टेः प्रागेक एवासीर्निर्विकल्पोऽनुपाधिकः ॥ त्वदाश्रया त्वद्विषया माया ते शक्तिरुच्यते ॥१९॥ त्वामेव निर्गुणं शक्तिरावृणोति यदा तदा ॥ अव्याकृतमिति प्राहुर्वेदांतपरिनिष्ठिताः ॥२०॥ मूलप्रकृतिरित्येके प्राहुर्मायेति केचन ॥ अविद्या संसृतिर्बंध इत्यादि बहुधोच्यते ॥२१॥

११ तत्त्वशंकावारणाय भगवद्रूपमेवाह सृष्टेः प्रागिति त्वमेक एवासीः निर्विकल्पः विकल्परूपसकलप्रपंचहीनः ॥ तत्र हेतुरनुपाधिक इति उपाध्यसंबंधसंबंध इत्यर्थः ॥ ननु किं सर्वथोपाधिर्नास्त्येवेति नेत्याह त्वदीति त्वमस्त्येव सा परं तु स्वकल्पितत्वात्संबंधहीना सा तस्त्वमनुपाधिक इत्याशयः ॥११ अथ सृष्टिमुपक्रमते त्वामिति त्वां

निर्गुणमेव संतमपरासाशक्तिः स्वकल्पितसंवंधेन त्वामावृणोति त्वत्संवंद्धामात्मानं मनुते न तु कदाचिदपि त्वं तत्संव
द्धमात्मानं मनुषे तो निर्गुणमेवेत्युक्तं तदा तां मायामव्याकृतमित्याहुः ॥२०॥ तस्मात्तदवस्थायां मायामोत्तरणमप्याह मूलप्र
कृतिरित्सादि तदुक्तं कपिलेन मूलप्रकृतिरविकृतिरित्यादिना ॥२१॥ सा त्वत्संवद्धामात्मानं मन्वाना अतएव त्वया संक्षो
भ्यमाणा संक्षोभश्चात्र तत्कल्पितसंवंध एवेति बोध्यं महत्तत्वमिति तु महत्तत्वमजायत महानिति यतः ख्यातिर्लोका
नां जायते सदेति स्मृतेः निश्चयोस्यासाधारणी वृत्तिः ॥ एतदभिमानिनि हिरण्यगर्भेपि महानिति शब्दः सर्वेषां स्वस्व

त्वया संक्षोभ्यमाणा सा महत्तत्वं प्रसूयते ॥ महत्तत्वादहंकारस्त्वया संचोदितादभूत् ॥२२॥ अहं
कारमहतत्वसंवृतस्त्रिविधोभवत् ॥ सात्विको राजसश्चैव तामसश्चेति भण्यते ॥२३॥ तामसात्सू
क्ष्मतन्मात्राण्यासन्भूतान्यतः परं ॥ स्थूलानि क्रमशो राम क्रमोत्तरगुणानि हि ॥२४॥

॥द्विरूपाः मतिनियतोपाध
यश्चास्यैव महतत्वस्यांशाः ॥ अस्यानेकबुद्धिमंडलरूपत्वादिति बोध्यं त्वया संचोदितात्प्रेरितान्महत्तत्वादहंकाकारो भूत्
स चाहं ममेत्यभिमानवृत्तिकमंतःकरणद्रव्यं अहंकारोभिमानश्च कर्त्तामंता च स स्मृत इति कौर्मोक्तिः अभिमानोभिमान
वृत्तिकः इत्यर्थः ॥२२॥ महतत्वसंवृतस्तदुपादानकत्वात् ॥ यथा घटो मृदा सत्वाद्युपाधिकत्वेन त्रैविध्यं मूलप्रकृतेस्तत्र त्रिगु
णत्वे तत्कार्यमहतत्वस्य त्रिगुणत्वं सात्विको राजसश्चैव तामसश्च त्रिधा महानिति स्मृतेः तत्कार्यत्वाच्चाहंकारस्य त्रैविध्यमे
वमग्रेपि बोध्यं ॥२३॥ सूक्ष्मतन्मात्राणि शब्दस्पर्शरूपरसगंधतन्मात्राणि अतः ॥ सूक्ष्मतन्मात्रेभ्यः स्थूलानि भूतानि तत्क्रमशो वृ

ए०अ०आ०
८

तन्मात्रादाकाशं स्पर्शतन्मात्रात्सर्वसहिताद्वायुः ताभ्यां सहिताद्रूपतन्मात्रात्तेजस्तैः सहितादसतन्मात्राज्जलं एतैः सहिता
द्गंधतन्मात्रात्पृथिवीत्यक्रमस्तु रूढत संक्षेपस्तत्र वृत्तौ विस्तरः॥ तदेवाह क्रमोत्तरगुणानीति क्रमेणाधिकगुणानि आ
काशं शब्दमात्रगुणं वायुः शब्दस्पर्शगुणस्तेजः शब्दस्पर्शरूपगुणं जलं शब्दस्पर्शरूपरसगुणं भूः शब्दस्पर्शरूपरस
गंधगुणेति॥२४॥ राजसादहंकारादिंद्रियाणि राजसाहंकारोपालकानि इत्यर्थः॥ तानि च वाक्पाणिपादपायूपस्थ

राजसानींद्रियाण्येव सात्विकादेवता मनः॥ तेभ्योभवत्सूत्ररूपं लिंगं सर्वगतं महत्॥२५॥ ततो वि
राट् समुत्पन्नः स्थूलाभूतकदंबकात्॥ विराजः पुरुषात्सर्वं जगत्स्थावरजंगमं॥२६॥ देवतिर्य
ग्मनुष्याश्च कालकर्मक्रमेण तु॥ त्वं रजोगुणतो ब्रह्मा जगतः सर्वकारणं॥२७॥ सत्वाद्विष्णुस्त्व
मेवास्य पालकः सद्भिरुच्यते॥ लये रुद्रस्त्वमेवास्य त्वन्मायागुणभेदतः॥२८॥ जाग्रत्स्वप्नसुषु
प्त्याख्या वृत्तयो बुद्धिजैर्गुणैः॥ तासां विलक्षणो राम त्वं साक्षी चिन्मयोऽव्ययः॥२९॥

॥ रूपाणि कर्मेंद्रिया

णि पंच चक्षुः श्रोत्रत्वग्रसनघ्राणाख्यानि ज्ञानेंद्रियाणि पंचेत्येवं दश वचनादानविहरणानंदोत्सर्गाश्च कर्मेंद्रियाणां
वृत्तयः ज्ञानेंद्रियाणां च सविकल्पकोभयरूपज्ञानरूपा वृत्तिः॥ तत्र निर्विकल्पके किंचिदिदमिति ज्ञानं देवता मनश्च
सात्विकाः॥ सात्विकाहंकारोपादाना इत्यर्थः देवता इंद्रियदेवताः॥ ताश्च चक्षुषो रविः श्रोत्रस्य दिक् त्वचो वायुः रसनस्य
वरुणः॥ घ्राणस्याश्विनौ वाचोऽग्निः॥ पाण्योरिंद्र यः पादयोरुपेंद्रः पायोर्मित्रः॥ उपस्थस्यस्य कोन्नलेति मनइंद्रियमपि श्रो

राम०
८

नरत्वात्स्थपयुक्ते सूत्ररूपं प्राणादिक्रियाप्रयुक्तेः प्राणादेरेव सूत्रत्वव्यवहारात् तदात्मकं हिरण्यगर्भरूपं लिंगं। सर्वकार्यकर्तृत्वात् सर्वसूक्ष्मसमष्टिरूपमभवदित्यर्थः॥२५॥ ततो विराट् स्थूलसमष्टिरयं तदाह स्थूलान्भूतकंदवकादितिरद्मिंडियादेरप्युपलक्षणं तस्मादेव विराजः पुरुषात्सर्वं स्थावरजंगमभसिव्यक्तःमित्यर्थः॥२६॥ तत्र जंगममाह देवेत्यादि कालकर्मक्रमेण यथा हेमंते व्रीहयो वसंते यवादि कर्मक्रमेण कालं सह सृजते न तिर्यङ्मनुष्यदेवत्वप्राप्तिः उपाधिभेदेन ब्रह्मादिरूपोपि त्वमेवेत्याह रजोगुणतः। तद्रूपोपाधेर्जगतः सर्वकारणं सर्वस्य जगतः कारणमित्यर्थः॥ आर्ष

सृष्टिलीलां यदा कर्तुमीहसे रघुनंदन॥ अंगीकरोषि मायां त्वं तदा वै गुणवानिव॥३०॥ राम माया
द्विधा भाति विद्याविद्येति ते सदा॥ प्रवृत्तिमार्गनिरता अविद्यावशवर्तिनः॥ निवृत्तिमार्गनिरता
वेदांतार्थविचारकाः॥३१॥ त्वद्भक्तिनिरता ये च ते वै विद्यामयाः स्मृताः॥ अविद्यावशगा ये तु नि
त्यं संसारिणश्च ते॥३२॥

(१त्वात्समासः॥२७॥ अस्य लये नाशनिमित्तं त्वमेव रुद्रनाम उपाधिक इत्यर्थः। एवं त्वं मायायाः गुणभेदैः सत्वरजस्तमोभिरेव तत्तत्प्राधान्येन बुद्धिजाग्रदादयो वृत्तय इत्यर्थः। त्वमेतदवस्थात्रयरहित इत्याह॥ नास्यमिति॥ स्वम्नसुषुप्तोरभावात् तत्प्रतिद्वंद्विजाग्रदवस्थाया अप्यभाव इति भावः॥२८॥२९ सृष्टिलीलामित्युपलक्षणं स्थित्यादेरपि यदाहसे इच्छसि तदा मायामंगीकरोषि तत्कल्पितं तत्कृतवंधंमन्यसे तदा वस्तुतोऽगुणोपि गुणवानिव भासि इति शेषः॥३०॥ तव मायैव संसारस्य मोक्षस्य च दाने समर्थेत्या

हरणमेति ॥ विद्यातज्ज्ञं अविद्यासंसारस्थूलकारणं तदुक्तं मार्कंडेयेनः सा विद्या परमा मुक्तेर्हेतुभूता सनातनी सं
सारबंधहेतुश्च सैव सर्वेश्वरेश्वरी इति ॥ ३१ ॥ विद्यामायाः तत्त्वज्ञानप्रधानाः सत्यपि प्रारब्धकर्मतो विक्षेपे
पुनःपुनस्तदनुसंधानवंधं तदित्यर्थः ॥ ३२ ॥ विद्याप्राप्तावसाधारणहेतुमाह लोके इति ॥ ३३ ॥ मुक्ता एव तेषां तत्त्व
ज्ञानस्यावश्यंभावित्वादिति भावः व्यतिरेकमप्याह ॥ त्वद्भक्तीति भक्तिरेव कथमिति चेत्तस्या अपि किंचि
द्धुमं कारणमस्तीत्याह ॥ ३४ ॥ क्षिंरणमेति ॥ तेइत्यस्याग्रेत इति शेषः स्वशिष्यविश्वासार्थं भगवदग्रत एवदुक्ति

विद्याभ्यासरता ये तु नित्यमुक्तास्त एव हि ॥ लोके त्वद्भक्तिनिरतास्त्वन्मंत्रोपासकाश्च ये ॥ वि
द्याप्रादुर्भवेत्तेषां नेतरेषां कदाचन ॥ ३३ ॥ अतस्त्वद्भक्तिसंपन्ना मुक्ता एव न संशयः ॥ त्वद्भक्त्य
मृतहीनानां मोक्षः स्वप्नेपि नो भवेत् ॥ ३४ ॥ साधवः समचित्ता ये निस्पृहा विगतैषिणः ॥ दांताः प्रशां
तास्त्वद्भक्ता निवृत्ताखिलकामनाः ॥ इष्टप्राप्तिविपत्त्योश्च समाः संगविवर्जिताः ॥ संन्यस्ता
खिलकर्म्माणः सर्वदा ब्रह्मतत्पराः ॥ ३५ ॥ + किं राम बहुनोक्तेन सारं किंचिद्ब्रवीमि ते ॥ साधुसंगतिरेवात्र मोक्षहेतुरुदाहृता ॥ ३५ ॥ २

॥ ३५ ॥ साधुस्वरूपज्ञाने एव तत्संगतिः शक्या चेत्यतस्तल्लक्ष
णमाह साधव इति समचित्ताः शत्रुमित्रयोरागद्वेषहीनचित्ताः । अत एव निस्पृहा रागद्वेषकारणीभूतस्पृ
हाहीनाः विगतैषणाः त्यक्तपुत्रवित्तादीच्छाः दांता बहिरिंद्रियोंतःकरणनिग्रहवंतः शांता अंतरिंद्रि
योंतःकरणनिग्रहवंतः विगतैषणा इत्यस्यैव व्याख्यानं निवृत्ताखिलकामना ॥ ३६ ॥ इष्टेति समाः हर्षवि

षादरहिताः संगवर्जिताः दुःसंगरहिताः । संन्यस्तेत्यादि त्यक्तकाम्यनित्यसकलकर्माणः तदेवाह सर्वदा ब्रह्म
तत्पराः ॥ ३७ ॥ यमादयो यमिति यमासनप्राणायामप्रत्याहारध्यानधारणसमाधयो योगशास्त्रोक्ताः यर्हि
यदा तेषां संगमो भवेत्तदा त्वत्कथाश्रवणे रतिः समुदेतीत्यन्वयः ॥ ३८ ॥ ततो भक्तिरवश्यं मम भूयात् ल
ब्धश्च मानस्य त्विस्याकारश्चित्तवृत्तिविशेषः प्रेमाख्यः तथा प्रेमवतस्त्वतज्ज्ञानं स्फुटमेवोदेतीत्यन्वयः
३९ ॥ अयं मार्गो मुख्यश्चतुरैः कुशलैः सेवितो मुक्तेर्मार्गः तस्मात् हे राघव त्वयि प्रेमलक्षणसद्भक्तिर्मे सदा

यमादिगुणसंपन्नाः संतुष्टा येनकेनचित् ॥ तत्संगमो भवेद्यर्हि त्वत्कथाश्रवणे रतिः ॥ ३८ ॥ स
मुदेति ततो भक्तिस्त्वयि राम सनातने ॥ त्वद्भक्तावुपपन्नायां विज्ञानं विपुलं स्फुटं ॥ ३९ ॥ उदे
३उ ति मुक्तिमार्गोयमाद्यश्चतुरसेवितः ॥ तस्माद्राघव सद्भक्तिस्त्वयि मे प्रेमलक्षणा ॥ ४० ॥ सदा भू
याद्धरे संगस्त्वद्भक्तेषु विशेषतः ॥ अद्य मे सफलं जन्म भवत्संदर्शनादभूत् ॥ ४१ ॥ अद्य मे
क्रतवः सर्वे बभूवुः सफलाः प्रभो ॥ ४२ ॥

॥ भूयात् हे हरे त्वद्भक्तेषु विशेषतः संगो भूयादित्यनुकर्षः
षंगः ॥ ४० ॥ ४१ ॥ क्रतवः सफला बभूवुः त्वत्प्रीतिरेव क्रतूनां मुख्यं फलं सा च मदाश्रमे आगमनात्त्वया
व्यक्तीकृता ॥ ४२ ॥ उक्तश्येमेवार्थं भंग्यंतरेणाह दीर्घेति ॥ ४३ ॥ अथ स्वेष्टं प्रार्थयते सदेति ॥ ४४ ॥ ४५ ॥ बा
णतूणीरौ बाणपूर्णौ तूणीरौ ॥ ४६ ॥ ४७ ॥ ४८ ॥ अशेषविदपि मानुष्यं नाटयन् प्रदर्शितं मार्गं ययौ ४९

इतिश्रीमध्यात्मरामायणस्यटीकायांश्रीरामवर्मणःकृतसेतौआरण्यकांडेतृतीयःसर्गः ॥३॥ मार्गेइतिददर्श
दृष्ट्वाचकिमेतमितिविस्मिताः ॥१॥२॥३॥४॥ वत्स्येवसामीस्वर्पःआर्षःप्रयोगः ॥५॥६॥ गृध्रमहाराजेतिषष्ठीस्तु

दीर्घकालंमयातप्तमनन्यमतिनातपः ॥ तस्येहतपसोराम फलंतवयदर्चनं ॥४३॥ सदामेसी
तयासार्धंहृदयेवसराघव ॥ गच्छतस्तिष्ठतोवापिस्मृतिःस्यान्मेसदात्वयि ॥४४॥ इतिस्तुत्वारमा
नाथमगस्त्योमुनिसत्तमः ॥ ददौचापंमहेंद्रेणरामार्थेस्थापितंपुरा ॥४५॥ अक्षय्यौबाणतूणी
रौखड्गौरत्नविभूषितः ॥ जहिराघवभूभारभूतंराक्षसमंडलं ॥४६॥ यदर्थमवतीर्णोसिमाय
यामनुजाकृतिः ॥ इतोयोजनयुग्मेतुपुण्यकाननमंडिते ॥४७॥ अस्तिपंचवटीनाम्नाआश्र
मोगौतमीतटे ॥ नेतव्यस्तत्रतेकालःशेषोरघुकुलोद्वह ॥ तत्रैवबहुकार्याणिदेवानांकुरुसत्प
ते ॥४९॥ श्रुत्वातदागस्त्यसुभाषितंवचःस्तोत्रंचनत्वार्घ्येसमेन्वितंविभुः ॥ मुनिंसमाभाष्यमुदा
न्वितोययौप्रदर्शितंमार्गमशेषविद्धरिः ॥५०॥ इतिश्रीमदध्यात्मरामायणेउ॰आ॰कांडेतृती
१ श्रीमहादेवउवाच ॥ यःसर्गः ॥३॥ मार्गेव्रजन्ददर्शाथशैलशृंगमिवस्थितं वृद्धंजटायुषंरामःकिमेतदितिविस्मि
तः ॥१॥ धनुरानयसौमित्रेराक्षसोयंपुरःस्थितः ॥ इत्याहलक्ष्मणंरामोहनिष्याम्यृषिभक्षकं
॥२॥

रूपः ॥ अत्रैववनेवसन्मेप्रियंकुर्वितिसंबंधः ॥७॥ आमंत्रितंसम्यक्बोधितंगृध्रमालिंग्पेस्पर्षः ॥८

ते गौतमीतीरं गोदावरीतीरं गत्वा पंचवट्यां पंचवटीसमीपे स्थिताः ततस्तत्र रामो लक्ष्मणेन सुविस्तरं मंदि

तच्छ्रुत्वा रामवचनं गृध्रराड्भयपीडितः ॥ ३ ॥ वधार्हो हिं न ते राम पितुस्तेहं प्रियः सखा । जटायु
र्नाम भद्रं ते गृध्रोहं प्रियकृत्तव ॥ ४ ॥ पंचवट्यामहं वत्स्ये तवैव प्रियकाम्यया ॥ मृगयायां कदाचि
त्तु प्रयाते लक्ष्मणेपि च ॥ ५ ॥ सीता जनककन्या मे रक्षितव्या प्रयत्नतः ॥ श्रुत्वा तद्गृध्रवचनं
रामः सस्नेहमब्रवीत् ॥ ६ ॥ साधु गृध्र महाराज तथैव कुरु मे प्रियं ॥ अत्रैव मे समीपस्थो नाति
दूरे वने वसन् ॥ ७ ॥ इत्यामंत्रितमालिंग्य ययौ पंचवटीं प्रभुः ॥ लक्ष्मणेन सह भ्रात्रा सीतया र
घुनंदनः ॥ ८ ॥ गत्वा ते गौतमीतीरं पंचवट्यां सुविस्तरं ॥ मंदिरं कारयामास लक्ष्मणेन सुबुद्धि
ना ॥ ९ ॥ तत्र ते न्यवसन्सर्वे गंगायाउत्तरे तटे ॥ कदंबपनसाम्रादिफलवृक्षसमाकुले ॥ १० ॥
विविक्ते जनसंबाधवर्जिते नीरुजस्थले ॥ विनोदयञ्जनकजां लक्ष्मणेन विपश्चिता ॥ ११ ॥ अधु
वास सुखं रामो देवलोक इवामरः ॥ कंदमूलफलादीनि लक्ष्मणोनुदिनं तयोः ॥ १२ ॥ आनीय प्र
ददौ राम सेवातत्परमानसः ॥ धनुर्बाणधरो नित्यं रात्रौ जागर्त्ति सर्वतः ॥ १३ ॥ स्नानं कुर्वंत्यनुदि
नं त्रयस्ते गौतमीजले ॥ उभयोर्मध्यगा सीता कुरुते च गमागमौ ॥ १४ ॥

॥ रं कारयामासः ॥ ९ ॥ गंगायाः
गंगात्र गौतम्येव ॥ १० ॥ जनसंबाधो जनसमूहनिष्क्रांता रुजा पीडा यस्मात् तादृशे स्थले लक्ष्मणेन सहात्र

ध्युवासेति संबंधः ॥ १२ ॥ १३ ॥ १४ ॥

१५॥१४॥ एकांतिकींगतीं अव्यभिचारिकारणमित्यर्थः॥१७॥ ननुमोक्षकारणंज्ञानमितिप्रसिद्धमेवेतिचेत्तत्स्व
रूपमेअस्यविषयइत्याह ज्ञानमिति ज्ञानंश्रवणमननजन्यंविज्ञानंनिदिध्यासनजंभक्तिर्ज्ञानविषयेप्रेमउक्तरू
पंवैराग्यंतदतिरिक्तेप्रेमाभवरूपं॥१८॥ वैकल्पिकंभ्रमं विकल्पएववैकल्पिकं विनयादित्वाट्टक् शब्दज्ञानानुजानीव
स्तुशून्योविकल्पइति योगसूत्रोक्तविकल्परूपंभ्रमंयथाप्राणप्राध्यंगादि यद्यपितदलीकमेवतथापिप्राणप्रा

आनीयसलिलंनित्यंलक्ष्मणःप्रीतमानसः॥सेवतेऽ हरहःप्रीत्याएवमासन्सुखंत्रयः
१५॥एकदालक्ष्मणोराममेकांतेसमुपस्थितं॥विनयावनतोभूत्वापप्रच्छपरमेश्वरं॥१६॥भग
वन्श्रोतुमिच्छामिमोक्षस्यैकांतिकींगतिं॥त्वत्तःकमलपत्राक्षसंक्षेपाद्वक्तुमर्हसि॥१७॥ज्ञानं
विज्ञानसहितंभक्तिवैराग्यबृंहितं॥आचक्ष्वमेरघुश्रेष्ठवक्तानान्योस्तिभूतले॥१८॥श्रीराम
उवाच॥शृणुवक्ष्यामितेवत्सगुह्यात्गुह्यतरंपरं॥यद्विज्ञायनरोजह्यात्सद्योवैकल्पिकंभ्रमं
१९॥आदौमायास्वरूपंतेवक्ष्यामितदनंतरं॥ज्ञानस्यसाधनंपश्चात्ज्ञानंविज्ञानसंयुतं॥२०॥

ध्यंगादिप्राणवृत्प्रयोगस्ततोबोधस्तद्भवत्येवतद्वदेवसर्वोपिव्यवहारःसंसाररूपस्तंऽज्ञानेनजह्यात्त
द्गुह्यंवक्ष्यामीत्यन्वयः॥१९॥तदुपयोगीतयावक्ष्यमाणान्यस्थानिनाममात्रेणक्रमतउद्दिशति॥आदाविति
२०॥ ॥०॥

तत्रमायास्वरूपमाह॥ अनात्मनीति आत्मबुद्धिः अहमिति बुद्धिः॥२१॥ परिकल्प्यते अभावस्तु भूत एव दृश्यते अथ
तादृशशक्तिमत्वं मायया: दर्शयति रूपेदिति पूर्वमित्यनेन तयो रूपयोरनादित्वं दर्शयति॥२२॥ के ते रूपे तत्राह
विक्षेपावरणे इति विक्षेपशक्तिरावरणशक्तिश्चेत्यर्थः प्रथमं विक्षेपरूपं लिंगं महत्तत्व॥ माद्यं यस्य तच्चतत्
ब्रह्मपर्यंतं चतुर्मुखब्रह्मांतमित्यर्थः॥२३॥ परमावरणरूपं तस्यान्वर्थत्वमाह॥ अखिलमिति सर्वज्ञानरूपा

ज्ञेयं च परमात्मानं यज्ज्ञात्वा मुच्यते भयात्॥ अनात्मनि शरीरादावात्मबुद्धिस्तु या भवेत्॥२१॥
सैव माया तयैवासौ संसारः परिकल्प्यते॥ रूपे द्वे निश्चिते पूर्वं मायायाः कुलनंदन॥२२॥ विक्षेपा
वरणे तत्र प्रथमं कल्पयेज्जगत्॥ लिंगाद्यब्रह्मपर्यंतं स्थूलसूक्ष्मविभेदतः॥२३॥ अपरं त्व
खिलं ज्ञानरूपमावृत्य तिष्ठति॥ मायया कल्पितं विश्वं परमात्मनि केवले॥२४॥ रज्जौ भुजंगव
द्भ्रांत्या विचारे नास्ति किंचन॥ श्रूयते दृश्यते यद्यत्स्मर्यते वा नरैः सदा॥२५॥

((वरकत्वात् आवर
णं व्यवहारस्तत्रेति भावः॥ ननु माया कुत्राधिष्ठाने इदं जगत्कल्पितवती तत्राह॥ परमात्मानीति तद्रूपं चै
तन्यमाछाद्य जगद्रूपं दर्शितमित्यर्थः॥२४॥ तत्र दृष्टांतमाह रज्जाविति रज्जुज्ञानं॥ यथ रज्जुमाछाद्य भु
जंगं कल्पयति तद्वत् विचारे विचारजे अधिष्ठानतत्वज्ञाने॥२५ ॥ ॥०॥ ॥ । ०॥ ०॥ ०॥ ०॥ ०॥०॥

सर्वस्य मिथ्यात्वे दृष्टांतौ स्वप्नेति यथा स्वप्ने श्रुतं च सर्वं मिथ्या जागरेनुभवात्तद्वत् देह एवेति तस्यैव सर्वसंसा
रकारणकर्मोत्पादकत्वादिति भावः ॥२६॥ तदाह तन्मूल इति अन्यथा देहाभावे ते पुत्रादय आत्मनः किं भवंति
न किमपीत्यर्थः पंचतन्मात्राणि इत्येतावानष्टादशात्मको लिंगदेहः सूक्ष्मः ॥२७॥ चिदाभास इति तस्य विशेष

असद्देवहितत्सर्वं यथा स्वप्नमनोरथौ ॥ देह एव हि संसारवृक्षमूलं दृढं स्मृतं ॥२६॥ तन्मूलः पुत्र
दारादिबंधः किं तेन्यथात्मनः ॥ देहस्तु स्थूलभूतानां पंचतन्मात्रपंचकं ॥२७॥ अहंकारश्च बुद्धि
श्च इंद्रियाणि तथा दश ॥ चिदाभासो मनश्चैव मूलप्रकृतिरेव च ॥२८ एतत्क्षेत्रमिति ज्ञेयं देह इत्य
भिधीयते ॥२९॥ एतैर्विलक्षणो जीवः परमात्मा निरामयः ॥ तस्य जीवस्य विज्ञाने साधनान्यपि मे
शृणु ॥३०॥ जीवश्च परमात्मा च पर्यायो नात्र भेदधीः ॥ मानाभावस्तथा दंभहिंसादिपरिवर्जनं ॥३१॥
पराक्षेपादिसहनं सर्वत्रावक्रता तथा ॥ मनोवाक्कायसद्भक्त्या सद्गुरोः परिसेवनं ॥३२॥

॥णं॥ चिताभास
ते अहमिति बुध्या विषयं इत्यर्थः ॥ मूलप्रकृतिस्त्वीश्वरो देहः सूक्ष्मैः एतस्य संघस्य जडत्वात् देहक्षेत्रादि
संज्ञा ॥२९॥ जीवः स एव परमात्मा ॥३०॥ अत्र जीवे परमात्मनि च तथात्र मानाभावः ॥ देशतः कालतश्चापरिच्छे
दाभावः ॥ अपत्तद्विज्ञानसाधनान्याह दंभेत्यादि ॥३१॥ परेति परकृताक्षेपादिर्निंदादिस्तत्सहनं मनोवाकाय

कृतसद्भक्त्या प्रेम्णा सद्गुरुसेवनं ३२॥

वाह्याभ्यंतरसंशुद्धिः उक्तरूपैव सत्क्रियादिषु स्थिरता अवश्यकर्त्तव्यताबुद्धिः परानिष्टाचिंतनं मनोदंडः पराक्षे
पाकरणं वाक्दंडः परहिंसा कायदंडः निरीहता इच्छाराहित्यं ॥२३॥ जन्मजराद्यालोचनं परेषां तदालोचनं मूल
कं वैराग्यं पुत्रादिष्वशक्तिः तस्यैव व्याख्यानं स्नेहशून्यत्वं ॥२४॥ चित्तस्य समता हर्षविषादराहित्यं अनन्यवि
षया तन्मात्रविषया ॥२५॥ जनसंवादो जनसमूहः प्राकृतैः संसारिकैः ॥ अरतिः अप्रीतिः ॥२६॥ आत्मज्ञाने तत्सा

बाह्याभ्यंतरसंशुद्धिः स्थिरता सत्क्रियादिषु ॥ मनोवाक्कायदंडश्च विषयेषु निरीहता ॥२३॥ नि
रहंकारता जन्मजराद्यालोचनं तथा ॥ असक्तिः स्नेहशून्यत्वं पुत्रदारधनादिषु ॥२४॥ इष्टानि
ष्टागमे नित्यं चित्तस्य समता तथा ॥ मयि सर्वात्मके रामे ह्यनन्यविषया मतिः ॥२५॥ जनसंबाधर
हितः शुद्धदेशनिषेवणं ॥ प्राकृतैर्जनसंघैश्च ह्यरतिः सर्वदा भवेत् ॥२६॥ आत्मज्ञाने सदोद्योगो
वेदांतार्थावलोकनं ॥ उक्तैरेतैर्भवेज्ज्ञानं विपरीतैर्विपर्ययः ॥२७॥ बुद्धिप्राणमनोदेहाहंकृतिभ्यो
विलक्षणः ॥ चिदात्माहं नित्यशुद्धो बुद्ध एवेति निश्चयं ॥२८॥ येन ज्ञानेन संवित्ते तज्ज्ञानं निश्चि
तं च मे ॥ विज्ञानं च तदैवैतत्साक्षादनुभवेद्यदा ॥२९॥

((धने श्रवणादावुद्योगः ॥ आदरपूर्वको यत्नः वे
दांतार्थस्यावलोकनं श्रवणं विचारश्च विपर्ययः संसारः ॥२७॥ बुध्यादिभ्यो विलक्षण इत्यादि निश्चयं ॥२८॥ ये
न ज्ञानेन यया शुद्धिजडत्वास संविंचेल भते तत् ज्ञानमिति मे निश्चितं निश्चियः तदैवैतत्परासाक्षादनुभवेत्

निदिध्यासतपरिपाके अपरोक्षमनुभवेत्तदा
विज्ञानमित्युच्यते २९

अथात्मन उक्तं बुध्यादिभ्यो वैलक्षण्यं दर्शयति। आत्मेति चिदेवानंदस्तदात्मकं यद्वा चित्त आनंदः समष्टिस्तदा-
त्मकः॥ बुध्याद्युपाधिभिस्तद्धर्मै रागादिभिः रहितः हीनः परिणामो रूपांतरापत्तिस्तद्वर्जितः आदिपदेन जडत्वभास्य-
॥४०॥ त्वादिः स एव सर्वभासक इत्याह स्वप्रकाशेनेति। सत्य ज्ञानादीति सत्यं ज्ञानमानंदं ब्रह्मेत्यादि श्रुत्युक्तलक्षणं
४१॥ स्वप्रभः स्वभासने इतरभासकानपेक्षः॥ द्रष्टा सर्वसाक्षी विज्ञानेन प्रागुक्तेन अवगम्यते विषयीक्रियते त

आत्मा सर्वत्र पूर्णः स्याच्चिदानंदात्मकोऽव्ययः॥ बुध्याद्युपाधिरहितः परिणामादिवर्जितः॥४०॥ स्व-
प्रकाशेन देहादीनूभासयन्ननपावृतः॥ एक एवाद्वितीयश्च सत्यज्ञानादिलक्षणः॥४१॥ असं-
गः स्वप्रभो द्रष्टा विज्ञानेनावगम्यते॥ आचार्यशास्त्रोपदेशादैक्यज्ञानं यदा भवेत्॥४२॥ आत्म-
नो ज्जीवपरयोर्मूलाविद्यातदैव हि॥ लीयते कार्यकरणैः सहैव परमात्मनि॥४३॥ सावस्था मुक्ति-
रित्युक्ता ह्युपचारोयमात्मनि॥ इदं मोक्षस्वरूपं ते कथितं रघुनंदन॥४४॥ ज्ञानविज्ञानवैराग्यस-
हितं मे परात्मनः॥ किं त्वेतद्दुर्लभं मन्ये मद्भक्तिविमुखात्मनां॥४५॥ चक्षुष्मतामपि यथा रात्रौ
सम्यङ् न दृश्यते॥ परं दीपसमेतानां दृश्यते सम्यगेव हि॥४६॥

॥ सज्ञानस्य मुख्यं कारणमाह॥ आचा-
र्येति आचार्यकृततत्त्वमस्यादिशास्त्रोपदेशाज्जीवपरयोरात्मनोर्यदैक्यं ज्ञानं तदपरोक्षानुभवः भवेत्तदै-
व मूलाविद्याकार्यैः स्थूलं करणमिंद्रियैस्तैः सह परात्मनि लीयते॥४२॥४३॥ सैवावस्था मुक्तिर्मुक्ता विद्यालय एव

मुक्तिरित्यर्थः। आत्मनः शुद्धस्य सर्वथाऽविद्याऽस्पृष्टस्य भेदरहितस्य ऐक्यज्ञानमविद्यालयद्यपि व्यवहारः
कंठचामीकरन्यायेन गौणइत्यर्थः। यथा कंठस्थं चामीकरं अन्यत्रान्विष्यति नष्टं तदिति बुध्वा अरे कंठे एवास्ते
इति केनचिदुक्ते लब्धं तदिति व्यवहारतितद्वत् एवं ज्ञानादिसहितं मे परात्मनो मोक्षस्वरूपं ते कथितं यामो
क्ष्यावस्थोक्ता तदेव मे स्वरूपमित्यर्थः मद्भक्तिविमुखात्मानां मत्प्रेमहीनानां ॥४४॥४५॥ यथ्यासनेत्राणामपि

एवं मद्भक्तियुक्तानामात्मा सम्यक्प्रकाशते॥ मद्भक्तेः कारणं किंचिद्वक्ष्यामि शृणुतत्वतः॥
॥४७॥ मद्भक्तसंगो मत्सेवा मद्भक्तानां निरंतरं॥ एकादश्युपवासादि मम पर्वानुमोदनं॥४८॥
मत्कथाश्रवणे पाठे व्याख्याने सर्वदा रतिः॥ मत्पूजापरिनिष्ठा च मम नामानुकीर्त्तनं॥४९॥ एवं स
ततयुक्तानां भक्तिरव्यभिचारिणी॥ मयि संजायते नित्यं ततः किमवशिष्यते॥५०॥ अतो मद्भक्ति
युक्तस्य ज्ञानं विज्ञानमेव च॥ वैराग्यं च भवेच्छीघ्रं ततो मुक्तिमवाप्नुयात्॥५१॥ कथितं सर्वमेतत्ते
तव प्रश्नानुसारतः॥ अस्मिन्मनः समाधाय यस्तिष्ठेत्स तु मुक्तिभाक्॥५२॥ न वक्तव्यमिदं यत्ना
न्मद्भक्तिविमुखाय हि॥ मद्भक्ताय प्रदातव्यमाहूयापि प्रयत्नतः॥५३॥

॥ रात्रौ पदं चोरादि पदं न दृश्यते न
दृग्विषये भवति दीपसंमेतानां तेषां तत्तदृग्विषयो भवति॥४६॥ एवं भक्तियुक्तानां सम्यक्मत्प्रकाशो भवति॥४७॥ अ
थ प्रतिज्ञातां भक्तिकारणान्याह॥ मद्भक्तेति मद्भक्तानां निरंतरमित्यत्र सेवेत्यनुषज्यते एकादश्युपवासादितद

तुष्टानित्यर्थः मम पाणिपर्वाणि उत्सवदीनानि रामनवम्यादीनि तेषां मदनुमोदनं तेषूत्सवकरणे ॥४८॥ परिनि
ष्टा तत्परता ॥४९॥ ततो मद्भक्तेरधिकं ज्ञानसाधनं किमविशिष्यते न किमप्यस्तीत्यर्थः ॥५०॥५१॥ तदेव स्फुटमा
ह ॥ अत इति ॥५२॥५३॥ अज्ञानपटलछन्नं ध्वांतात्मन आत्मनः शांतचित्ता श्च तेषां मत्सेवायामभिरतं प्रीतियुतं आ
त्मवित्तं येषां विमलज्ञानरूप आत्मा येषां ज्ञानविषयस्तेषां उद्यता ज्ञानविषये उद्यमशालिनी मतिर्यस्य सः

य इदं तु पठेन्नित्यं श्रद्धाभक्तिसमन्वितः ॥ अज्ञानपटलध्वांतं विधूय परिमुच्यते ॥५४॥ भक्तानां
मम योगिनां सुविमलस्वांतातिशांतात्मनां मत्सेवाभिरतात्मनां च विमलज्ञानात्मनां सर्वदा ॥ संगं
यः कुरुते सदोद्यतमतिः सत्सेवनानन्यधीर्मोक्षस्तस्य करे स्थितो हमनिशं दृश्यो भवे नान्यथा ॥५५॥ इ
४ श्रीमहादेव उवाच ति म॰ आ॰ च॰ स॰ ॥४॥ तस्मिन्काले महारण्ये राक्षसी कामरूपिणी ॥ विचचार महासत्वा जनस्था
ननिवासिनी ॥१॥ एकदा गौतमीतीरे पंचवट्याः समीपतः ॥ पद्मवज्रांकुशांकानि पदानि जगतीप
तेः ॥२॥ दृष्ट्वा कामपरीतात्मा पादसौंदर्यमोहिता ॥ पश्यंती सा शनैरायाद्राघवस्य निवेशनं ॥३॥

सतां सेवनेनान्यधीस्तत्पर इत्यर्थः ॥ तस्यातिसमहं दृश्यो भवे आत्मने परमार्थे नान्यथा तादृशसंगविना न म
द्दर्शनं नापि मोक्ष इत्यर्थः ॥५५॥ इति श्रीमदध्यात्मरामायणे आरण्यकांडे चतुर्थः सर्गः ॥ तस्मिन्निति महासत्वा
महाबला ॥१॥ पद्मेत्यादि चिन्हानि तद्युक्तानीत्यर्थः ॥२॥ कामपरितात्मा कामव्याप्तचित्ता पश्यंती तस्य हानि

पश्यंती तेनैव चिह्नेन राघवाश्रममायात् ॥३॥

४ कः किन्नामा जटावल्कलाद्यैर्युक्तः। आश्रमे किं वससीति शेषः अत्र वासेन ते किं साध्यं तद्ब्रवद। ५। अथ तस्याश्च वि
नैव तज्जिज्ञासां संभाव्य स्वस्योत्तमकुलत्वादि च बोधयितुं स्वस्वरूपमाहाहमिति। ६। खरेण भ्रात्रा सहितेत्यन्वयः
सर्वं वनमिति शेषः। ७। ८। ९। ते किं कृत्यं मया कार्यं करणीयं तद्ब्रूहीत्यन्वयः। १०। गिरिकानने समाहारद्वंद्वः

तत्र सा तं रमानाथं सीतया सह संस्थितं। कंदर्पसदृशं रामं दृष्ट्वा कामविमोहिता। ४। राक्षसी रा
घवं प्राह कस्य त्वं कः किमाश्रमे। युक्तो जटावल्कलाद्यैः साध्यं किं तेत्र मे वद। ५। अहं शूर्प
नखा नाम राक्षसी कामरूपिणी। भगिनी राक्षसेंद्रस्य रावणस्य महात्मनः। ६। खरेण सहिता भ्रा
त्रा वसाम्यत्रैव कानने। राज्ञा दत्तं च मे सर्वं मुनिभक्षा वसाम्यहं। ७। त्वां तु वेदितुमिच्छामि वद मे
वदतां वर। तामाह रामनामाहमयोध्याधिपतेः सुतः। ८। एषा मे सुंदरी भार्या सीता जनकनंदि
नी। स तु भ्राता कनीयान्मे लक्ष्मणोतीव सुंदरः। ९। किं कृत्यं ते मया ब्रूहि कार्यं भुवनसुंदरि।
इति रामवचः श्रुत्वा कामार्ता साब्रवीदिदं। १०। एहि राम मया सार्धं रमस्व गिरिकानने। कामा
र्ताहं न शक्नोमि त्यक्तुं त्वां कमलेक्षण। ११। रामः सीतां कटाक्षेण पश्यन्सस्मितमब्रवीत्
भार्या ममैषा कल्याणी विद्यते ह्यनपायिनी। १२।

॥ गिरिषु काननेषु चेत्यर्थः। ११। अनपायिनी
सर्वथा त्यक्तुमशक्या क्षणमप्यविभक्ता च। १२। ॥ श्री रामरामरामरामरामराम रामः

तद्देवाह त्वं त्विति ॥१३॥ तेनैव सह संचर गिरिकानने इति शेषः ॥१४॥ सुंगच्छावः मिथुनाभवं प्राप्नुवः ॥१५॥१६
१७॥ क्रोधाद्रवदद्धि इति शेषः किमवदत्त रामे स्यादि अतव स्थितः सस्येवचसीति शेषः ॥ तां पत्नीत्या मामेवं

त्वं तु सापत्न्यदुःखेन कथं स्थास्यसि सुंदरि ॥ बहिरास्ते मम भ्राता लक्ष्मणोतीव सुंदरः ॥१३॥ त
वानुरूपो भविता पतिस्तेनैव संचर ॥ इत्युक्ता लक्ष्मणं प्राह पतिर्मे भव सुंदर ॥१४॥ भ्रातुराज्ञां पुर
स्कृत्य संगच्छावो घमाचिरं ॥ इत्याह राक्षसी घोरा लक्ष्मणं काममोहिता ॥१५॥ तामाह लक्ष्मणः सा
ध्वि दासोहं तस्य धीमतः ॥ दासी भविष्यसि त्वं तु ततो दुःखतरं नु किं ॥१६॥ तमेव गच्छ भद्रं ते स
तु राजाखिलेश्वरः ॥ तच्छ्रुत्वा पुनरप्यागाद्राघवं दुष्टमानसा ॥ क्रोधाद्राम किमर्थं मां भ्रामयस्य
नवस्थितः ॥ इदानीमेव त्वां सीतां भक्षयामि तवाग्रतः ॥ इत्युक्त्वा विकटाकारा जानकीमनुधावती
ततो रामाज्ञया खड्गमादाय परिगृह्य तां ॥१९॥ चिच्छेद कर्णौ नासां च लक्ष्मणो लघुविक्रमः त
तो घोरध्वनिं कृत्वा रुधिराक्तवपुर्द्रुतं ॥२०॥ क्रंदमाना पपाताग्रे खरस्य परुषाक्षरा ॥ किमेतदि
ति तामाह खरः खरतराक्षसः ॥२१॥ केनैवं कारितासि त्वं मृत्योर्वक्त्रानुवर्त्तिना ॥ वद मे तं वधि
ष्यामि कालकल्पमपि क्षणात् ॥२२॥ तमाह राक्षसी रामः सीतालक्ष्मणसंयुतः ॥ दंडके नि
र्भयं कुर्वन्नास्ति गोदावरीतटे ॥२३॥

१ भ्रामयसि तामिति शेषः ॥१८॥ तां परिगृह्य सत्वा ॥१९॥२०॥ परु
षाक्षरा खरधिः कृतिबोधकक्रंदवाक् ॥२१॥ एवं नासाकर्णविहीना तन्मे वदत महं वधिष्यामीत्यान्वयः

तेन रामेण नोदितः प्रेरितः ॥२४॥२५॥ आगात् प्रस्थितः ॥२६॥ रामस्य समीपं गंतुं प्रचोदयामास प्रेरयामास वधकां
क्षये त्वस्य रामस्य वधकांक्षये ॥ स्ववधेछयेति तत्वार्थः ॥२७॥२८॥ २९॥ सीतां नीत्वा गृहीत्वेत्यर्थः ॥३०॥ शा

मामेवं कृतवांस्तस्य भ्राता तेनैव चोदितः ॥ यदि त्वं कुलजातोसि वीरोसि जहि तौ रिपू ॥२४॥ तयो
स्तु रुधिरं पास्ये भक्षये तौ सुदुर्मदौ ॥ नो चेत्प्राणान्परित्यज्य यास्यामि यमसादनं ॥२५॥ तच्छ्रुत्वा
त्वरितं प्रागात् खरः क्रोधेन मूर्छितः ॥ चतुर्दश सहस्राणि रक्षसां भीमकर्मणां ॥२६॥ चोदयामा
स रामस्य समीपं वधकांक्षया ॥ खरश्च त्रिशिराश्चैव दूषणश्चैव राक्षसः ॥२७॥ सर्वे रामं ययुः
शीघ्रं नानाप्रहरणोद्यताः ॥ श्रुत्वा कोलाहलं तेषां रामः सौमित्रिमब्रवीत् ॥२८॥ श्रूयते विपुलः श
ब्दो नूनमायांति राक्षसाः ॥ भविष्यंति महद्युद्धं नूनमद्य मया सह ॥२९॥ सीतां नीत्वा गुहां गत्वा तत्र
तिष्ठ महाबल ॥ हंतुमिच्छाम्यहं सर्वान् राक्षसान् घोररूपिणः ॥३०॥ अत्र किंचिन्न वक्तव्यं शा
पितोसि ममोपरि ॥ तथेति सीतामादाय लक्ष्मणो गह्वरं ययौ ॥३१॥ रामः परिकरं बध्वा धनु
रादाय निष्ठुरं ॥ तूणीरावक्षयशरौ बध्वा यत्तो भवद्विभुः ॥३२॥ ततश्चागत्य रक्षांसि रामस्योप
रि चिक्षिपुः ॥ आयुधानि विचित्राणि पाषाणान्पादपानपि ॥३३॥

पितोसि ममोपरि मदीयशपथ इत्यर्थः ॥३१॥ यत्तः सन्नद्धः ॥३२॥ ॥३३ ०॥ ३४ ०॥ ३५ ०॥ ०॥ ०॥ ०॥

रा०अ०आ० ३६॥ शस्त्रव्रणानि शस्त्रजव्रणानि मार्जिति रुधिराणि पूर्णगर्तानि सत्यसंकल्पत्वाच्चकारेत्यर्थः॥३७ राव
१६

खरं त्रिशिरसं चैव दूषणं चैव राक्षसं॥ जघान महूर्तार्द्धेन सर्वानेव रघूत्तमः॥३५॥+ तानि वि
च्छेद रामोपि लीलया तिलशः क्षणात्॥ ततो बाणसहस्रेण हत्वा तान्सर्वराक्षसान्॥३४॥+
लक्ष्मणोपि गुहामध्यात्सीतामादाय राघवे॥ समर्प्य राक्षसान्दृष्ट्वा हतान्विस्मयमाययो
३६॥ सीता रामं समालिंग्य प्रसन्नमुखपंकजा॥ शस्त्रव्रणानि चांगेषु ममार्ज जनकात्मजा
३७॥ सापि दुद्राव दृष्ट्वा तान्हतान्राक्षसपुंगवान्॥ लंकां गत्वा सभामध्ये क्रोशंती पादसन्निधौ
३८॥ रावणस्य पपातोर्व्यां भगिनी तस्य रक्षसः॥ दृष्ट्वा तां रावणः प्राह भगिनीं भयविह्वलां॥३९॥
उत्तिष्ठोत्तिष्ठ वत्से त्वं विरूपकरणं तव॥ कृतं शक्रेण वा भद्रे यमेन वरुणेन वा॥४०॥ कुबेरे
णाथवा ब्रूहि भस्मीकुर्यां क्षणेन तं॥ राक्षसी तमुवाचेदं त्वं प्रमत्तो विमूढधीः॥४१॥ पाना
सक्तः स्त्रीविजितः षंढः सर्वत्र लक्ष्यसे॥ चारचक्षुर्विहीनस्त्वं कथं राजा भविष्यसि॥४२॥
खरश्च निहतः संख्ये दूषणस्त्रिशिरास्तथा॥ चतुर्दश सहस्राणि राक्षसानां महात्मनां राम०
॥४३॥ निहतानि क्षणेनैव रामेणासुरशत्रुणा॥ जनस्थानमशेषेण मुनीनां निर्भयं कृतं॥ १६
न जानासि विमूढस्त्वमत एवं मयोच्यते॥४४॥

॥ एस्य पादसंनिधावुर्व्यां पपातेत्यन्वयः
३८॥३९॥ विरूपकारणं वैरूप्यमिति यावत्॥४०॥

अथवा कुबेरेण हृतं तद्गृहीत्यन्वयः ॥४१॥ षंडः शत्रुघ्नुपो रूपहीनः चारुरूपैश्चक्षुभिर्विहीनः अत एवम
योग्यते पानासक्त इत्यादि श्लोकरूपं वाक्यमित्यर्थः ॥४२॥४३॥४४॥ किमर्थं किस्मै प्रयोजनाय कथं केन

॥ एवमुक्त उवाच ॥ को वा रामः किमर्थं वा कथं तेनासुरा हताः ॥ सम्यक् कथय मे तेषां मूलघातं क
रोम्यहं ॥४५॥ शूर्पणखोवाच जनस्थानादहं भ्राता कदाचिद्गौतमीतटे ॥ तत्र पंचवटीना
म पुरा मुनिजनाश्रया ॥४६॥ तत्राश्रमे मया दृष्टो रामो राजीवलोचनः ॥ धनुर्बाणधरः श्री
मान्जटावल्कलमंडितः ॥४७॥ कनीयाननुजस्तस्य लक्ष्मणोपि तथाविधः ॥ तस्य भार्या वि
शालाक्षी रूपिणी श्रीरिवापरा ॥४८॥ देवगंधर्वनागानां मनुष्याणां तथाविधा ॥ न दृष्टा न
श्रुता राजन्द्योतयंती वनं शुभा ॥४९॥ आनेतुमहमुद्युक्ता तां भार्यार्थं तवानघ ॥ लक्ष्मणे
नाम तद्भ्राता चिच्छेद मम नासिकां ॥५०॥ कर्णौ च नोदितस्तेन रामेण महाबलः ॥ ततोहम
तिदुःखेन रुदती खरमन्वगां ॥५१॥ सोपि रामं समासाद्य युद्धं राक्षसयूथपैः ॥ ततः क्षणे
न रामेण तेनैव बलशालिना ॥५२॥ सर्वे तेन विनष्टा वै राक्षसा भीमविक्रमाः ॥ यदि रामो मनः
कुर्यात्त्रैलोक्यं निमिषार्द्धतः ॥५३॥

॥ प्रकारेण सुराः खरादयो हताः तेषां रामादीनां ॥४५॥ पंचव
टीनाम आश्रम इति शेषः ॥४६॥४७॥४८॥ द्योतयंती शोभयंती ॥४९॥५०॥५१॥ राक्षसयूथपैः सह युद्धमकरोदिति

शेषः ५२ विनष्टाः विनाशिता इत्यर्थः अंतर्भा
वितसपर्थः ५३

५४॥५५॥ रघुत्तमं मायया मोहयित्वा तां प्राप्स्यसे स्पर्धः॥५६॥ ततः शूर्पणखावाक्यं स्त्रुत्वैवरिराघ्यासनवाक्येदीनाति
भिर्भगिनीमाश्वास्य स्वंगृहं प्रविवेशएसत्वयः॥५७॥ नष्टः नाशितः॥ पृष्टोकावेघ्या दुःखमेव पुनराह॥ भ्रातेतिवलंशारी

भस्मीकुर्यान्न संदेह इति भाति मम प्रभो॥ यदिस्यात तव भार्यस्या सफलं तव जीवितं॥५४॥ अतो
यतस्व राजेंद्र यथा तेवल्लभा भवेत्॥ सीता राजीवपत्राक्षी सर्वलोकैकसुंदरी॥५५॥ साक्षा
३ सं द्रामस्य पुरतः स्थातुं न क्षमः प्रभो॥ मायया मोहयित्वा तु प्राप्स्यसे तां रघूत्तमं॥५६॥ श्रुत्वात
त्सूक्तवाक्यैश्च दानमानादिभिस्तथा॥ आश्वास्य भगिनीं राजा प्रविवेश स्वकं गृहं॥ तत्र
चिंतापरो भूत्वा निद्रां रात्रौ न लब्धवान्॥५७॥ एकेन रामेण कथं मनुष्यमात्रेण नष्टः सब
लः खरो मे॥ भ्राता कथं मेवलवीर्यदर्पयुतो विनष्टो बत राघवेण॥५८॥ यद्वा न रामो मनु
जः परेशो मां हंतुकामः सबलं बलौघैः॥ संप्रार्थितोयं द्रुहिणेन पूर्वं मनुष्यरूपोद्यरघोः कु
लेभूत्॥५९॥ वध्यो यदि स्यां परमात्मनाहं वैकुंठराज्यं परिपालयेहं॥ नो चेदिदं राक्षसरा राम॰ १७
ज्यमेव भोक्ष्ये चिरं राममतो व्रजामि॥६०॥
॥रं वीर्यमांतरं बलं दर्पोहंकारः॥५८॥ परेशः परमात्मा
बलौघैः वानरबलसमूहैः॥ द्रुहिणेन ब्रह्मणा॥५९॥ अतः आत्मराज्यहान्या महत्तरराज्यप्राप्तेः॥६०॥

भक्त्या द्रुतं ऽअल्पकालहृत्तयाप्यशीघ्रं न प्रसीदेत् ॥ एतद्राज्यस्यार्जनपूर्वं महद्राज्यं न प्रापयेत् ॥ ६१ ॥ इति श्रीमद
ध्यात्मरामायणटीकायां रामवर्मणः कृतौ सेतौ आरण्यकांडे पंचमः सर्गः ॥ ५ ॥ एकं कार्यं सीताहरणेन राम
तो मत्सुरूपं ॥ १ ॥ २ ॥ गुणाः प्रकृतितत्कार्याणि तदवभासकं ॥ ३ ॥ ४ ॥ एतदेकेन रथेन समागमनं किमर्थं तद्ब्रूहि

इत्थं विचिंत्याखिलराक्षसेंद्रो रामं विदित्वा परमेश्वरं हरिं ॥ विरोधबुद्ध्यैव हरिं प्रयामि द्रुतं
न भक्त्या भगवान् प्रसीदेत् ॥ ६१ ॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे आरण्यकां
श्रीमहादेव उवाच ३ डे पंचमः सर्गः ॥ ५ ॥ विचिंत्यैवं निशायां स प्रभाते रथमास्थितः ॥ रावणो मनसा कार्यमेकं नि
श्चित्य बुद्धिमान् ॥ १ ॥ ययौ मारीचसदनं परं पारमुदन्वतः ॥ मारीचस्तत्र मुनिवज्जटावल्क
लधारकः ॥ २ ॥ ध्यायन् हृदि परात्मानं निर्गुणं गुणभासकं ॥ समाधिविरमे पश्यद्रावणं गृ
हमागतं ॥ ३ ॥ द्रुतमुत्थाय मालिंग्य पूजयित्वा यथाविधि ॥ कृतातिथ्यं सुखासीनं मारीचो वा
क्यमब्रवीत् ॥ ४ ॥ समागमनमेतत्ते रथेनैकेन रावण ॥ चिंतापर इवाभासि हृदि कार्यं विचिंतय
न् ॥ ५ ॥ ब्रूहि मे न हि गोप्यं चेत्करवाणि तव प्रियं ॥ न्याय्यं चेद्ब्रूहि राजेंद्र वृजिनं मां स्पृशेन्न हि ॥ ६ ॥

ति शेषः ॥ हृदि किंचित्कार्यं विचिंतयन् चिंतापर इवाभासि तत्कार्यं किमिति ब्रूहीति अन्वयः ॥ ५ ॥ न्याय्यं ध
र्म्यं हि यतो यत्कार्यकरणे मां वृजिनं पापं न स्पृशेत् ॥ ६ ॥ राम ॥ राम ॥ राम राम राम राम राम रामः ॥

रा०अ०आ०
१८

साकेतमयोध्या ॥ ७ ॥ वनविशेषणं वनजनप्रियमिति ॥ ८ ॥ ९ ॥ १० ॥ कर्णौ चिच्छेद तथापि निर्भय इत्यन्वयः ॥ ११
१२ ॥ मायामृगमायाविचित्रमृगरूपधरः ॥ १३ ॥ सहायं सहायत्वं ॥ १४ ॥ इदं वचः सीतोत्तमा स्त्री सा हर्त्तव्येवं रू
पं यो दुरूपदेशेन त्वन्नाशं प्रतीक्षते दृष्टमिच्छतीति स एव शत्रुर्न रामः स एव वध्यश्चेत्यर्थः ॥ १५ ॥ रामस्य पौरुषं

रावण उवाच ॥ अस्ति राजा दशरथः साकेताधिपतिः किल ॥ रामनामा सुतस्तस्य ज्येष्ठः सत्य
पराक्रमः ॥ ७ ॥ विवासयामास सुतं वनं वनजनप्रियं ॥ भार्यया सहितं भ्रात्रा लक्ष्मणेन समन्वि
तं ॥ ८ ॥ स चास्ते विपिने घोरे पंचवट्याश्रमे शुभे ॥ तस्य भार्या विशालाक्षी सीता लोकविमो
हिनी ॥ रामो निरपराधान्मे राक्षसान् भीमविक्रमान् ॥ खरं च हत्वा विपिने सुखमास्ते विनिर्भ
यः ॥ १० ॥ भगिन्या मे शूर्पनखा निर्दोषायाश्च नासिकां ॥ कर्णौ चिच्छेद दुष्टात्मा वने तिष्ठति नि
र्भयः ॥ ११ ॥ अतस्त्वया सहायेन गत्वा तत्राद्य वल्लभां ॥ आनयिष्यामि विपिने रहिते राघवेण तां
॥ १२ ॥ त्वं तु मायामृगो भूत्वा ह्याश्रमादपनेष्यसि ॥ रामं च लक्ष्मणं चैव तदा सीतां हराम्यहं ॥ १३ ॥
त्वं तु नावत्सहायं मे कृत्वा स्यास्यसि पूर्ववत् ॥ इत्येवं भाषमाणं तं रावणं वीक्ष्य विस्मितः ॥ १४ ॥
केनेदमुपदिष्टं ते मूलघातकरं वचः ॥ स एव शत्रुर्वध्यश्च यस्त्वन्नाशं प्रतीक्षते ॥ १५ ॥

राम०
१८

॥ स्मृत्वा अ
द्यापि मे चित्तं विकलमित्यर्थः ॥ स्मर्यमाणं पौरुषं किंचिदेव निदर्शनामाह बालोपीति कौशिकयज्ञरक्ष

णायागतो बालोपि राम एकेनेषुणाऽनेकयोजनशतमुद्धृत्य मां सागरे पातयाञ्चमास तदेव राममक्रमीहं स्म
त्वा रामं सर्वतः सर्वत्र पश्यामि ॥१६॥१७॥१८॥ तीक्ष्णशृंगमृगरूपं धृत्वेति शेषः ॥१९॥२०॥ तेन शरेण ऊर्जितं राम

रामस्य पौरुषं स्मृत्वा चित्तमद्यापि रावण ॥ बालोपि मां कौशिकस्य यज्ञसंरक्षणाय सः ॥१६
आगतस्त्विषुणैकेन पातयामास सागरे ॥ योजनानां शतं रामस्तदादि भयविह्वलः ॥१७॥
स्मृत्वा स्मृत्वा तदेवाहं रामं पश्यामि सर्वतः ॥१८॥ दंडकेपि पुनरप्यहं वने पूर्ववैरमनुचिंतय
न् हृदि ॥ तीक्ष्णशृंगमृगरूपमेकदा मादृशैर्बहुभिरावृतोभ्ययां ॥१९॥ राघवं जनकजासम
न्वितं लक्ष्मणेन सहितं त्वरान्वितः ॥ आगतोहमथ हंतुमुद्यतो मां विलोक्य शरमेकमक्षि
पत् ॥२०॥ तेन विद्धहृदयोहमुद्भ्रमन्राक्षसेंद्र पतितोस्मि सागरे ॥ तत्प्रभृत्यहमिदं समाश्रि
तः स्थानमूर्जितमिदं भयार्दितः ॥२१॥ राममेव सततं विभावये भीतभीत इव भोगराशितः
राजरत्नरमणीरथादिकं श्रोत्रयोर्यदि गतं भयं भवेत् ॥२२॥ राम आगत इहेति शंकया बा
ह्यकार्यमपि सर्वमत्यजं ॥ निद्रया परिवृतो यदा स्वपे राममेव मनसानुचिंतयन् ॥२३॥

नामगमन निश्चयेन निर्भयं ॥२१॥ यद्वस्तु भोगसमूहसाधनं ततोपि भीतभीत अत्यंतं राममेव भावये तदेवोप
पादयति राजेति रेफवत्वेन भोगसाधनानामप्येषां श्रवणे रामस्मारकतया भजनमित्यर्थः ॥२२॥ रामागमनशं
कया बाह्यकार्यं परित्यज्य निद्राणोपि राममेव चिं
तयन् स्वपे इति परस्मैपदमार्षं ॥२३॥

तदास्वप्नदृष्टिगत रामराघवंस्वात्मज्ञानविषयंराघवंपश्यमेवबोधितोविगतनिद्र आस्थित आसनेभयेयमितिशे
षः राघवंप्रत्याग्रहंविमुच्येत्यन्वयः॥२४॥चिरागतं चिरेणवृद्धिंप्राप्तं राक्षसकुलंरक्षएवंविरोधेनतत्स्मृतौसकल्ल
मेरक्षः कुलंनश्यतिराघवेतद्विषये॥२५॥विरोधमतिं विरोधसंपादिकांमतिं पुनरपि तद्विरोधान्निवृत्त्यये इति हा

स्वप्नदृष्टिगत राघवंतदाबोधितोविगतनिद्रआस्थितः॥तद्भवानपिविमुच्यचाग्रहंराघवं
प्रतिगृहंप्रयाहिभो॥२४॥रक्षराक्षससत्कुलंचिरागतंतत्स्मृतौसकलमेवनश्यति॥तवहितं
वदतोममभाषितंपरिगृहाणपरात्मनिराघवे॥२५॥त्यजविरोधमतिंभजभक्तितःपरमका
रुणिकोरघुनंदनः॥अहमशेषमिदंमुनिवाक्यतोश्रुणवमादियुगेपरमेश्वरः॥२६॥ब्रह्म
णार्थितउवाचतंहरिःकितवेष्टितमहंकरवाणितत॥ब्रह्मणोक्तमरविंदलोचनंत्वंप्रयाहिभु
विमानुषंवपुः॥२७॥दशरथात्मजभावमंजसाजहिरिपुंदशकंधरंहरे॥अतोनमानुषोरा
मःसाक्षान्नारायणोव्ययः॥मायामानुषवेषेणवनेयातोतितिनिर्भयः॥२८॥भूभारहरणार्था
यगच्छतातगृहंसुखं॥श्रुत्वामारीचवचनंरावणःप्रसभाषत॥२९परमात्मायदारामःप्रार्थितो
ब्रह्मणाकिल॥मांहंतुंमानुषोभूत्वायत्नादिहसमागतः॥३०॥

॥स्मांतरमाह॥अहमितिमुनिरत्रनारदः
आदियुगेसत्ययुगे॥२६॥ततत्वरेतिशेषः मानुषंवपुर्धत्स्वेतिशेषः॥२७॥दशरथात्मजभावंदशरथपुत्र

त्वंप्राप्यांजशीशीघ्रमेव॥२८॥२९॥३०॥

सत्यः संकल्प इच्छा यस्य सः राघवात् राघवं वंचयित्वेत्यर्थः ॥ ३१ ॥ मया रामाद्वधे प्राप्ते सति हे वीर अहं परमं व
दं प्राप्स्यामि ॥ ३२ ॥ अतो तिष्ट अतिउत्तिष्ट संधिरार्षः ॥ ३३ ॥ यथापुरा यथापूर्वमत्राश्रमे सुखं तिष्टेत्यन्वयः

करिष्यत्यचिरादेव सत्यसंकल्प ईश्वरः ॥ अतोहं यत्नतः सीतामानेष्याम्येव राघवात् ॥ ३१ ॥
वधे प्राप्ते रणे वीर प्राप्स्यामि परमं पदं ॥ यद्वा रामे रणे हत्वा सीतां प्राप्स्यामि निर्भयः ॥ ३२ ॥ अ
तोत्तिष्ठ महाभाग विचित्रमृगरूपधृक् ॥ रामं सलक्ष्मणं शीघ्रमाश्रमादतिदूरतः ॥ ३३ ॥ आ
कृष्य गच्छ त्वं शीघ्रं सुखं तिष्ठ यथापुरा ॥ अतः परं चेद्यत्किंचिद्भाषसे मद्विभीषणं ॥ ३४ ॥ ह
निष्याम्यसिनानेन त्वामत्रैव न संशयः ॥ मारीचस्तद्वचः श्रुत्वा स्वात्मन्येवानुचिंतयत् ॥ ३५ ॥
यदि मां राघवो हन्यात्तदा मुक्तो भवार्णवात् ॥ मां हन्याद्यदि चेद्दुष्टस्तदा मे निरयो ध्रुवं ॥ ३६ ॥
इति निश्चित्य मरणं रामादुत्थाय वेगतः ॥ अब्रवीद्रावणं राजन् करोम्याज्ञां तव प्रभो ॥ ३७ ॥
इत्युक्त्वा रथमास्थाय गतो रामाश्रमं प्रति ॥ शुद्धजांबूनदप्रख्यो मृगो भूत्वौप्यबिंदुकः ॥ ३८ ॥
रत्नशृंगो मणिखुरो नीलरत्नविलोचनः ॥ विद्युत्प्रभो विमुग्धास्यो विचचार वनांतरे ॥ ३९ ॥
रामाश्रमपदस्यांते सीतादृष्टिपथे चरत् ॥ ४० ॥

॥ ३४ ॥ ३५ ॥ भवार्णवान्मुक्तो भविष्यामीति शेषः ॥ ३६ ॥ रामान्म
रणमेव सम्यगिति निश्चित्य ॥ ३७ ॥ गतो मारीचि रावणौ जांबूनदं सुवर्णं ॥ ३८ ॥ विमुग्धं सुंदरमास्यं यस्य सः ॥ ३९ ॥
॥ ४० ॥

रा०अ०आ०
२०

पुनर्भयावृतः पलायत इति शेषः ॥४९॥ इति श्रीरामायणे टीकायां० आ० षष्ठः सर्गः ॥६॥ अथेति ॥१॥ त्वदाकारं तवा
कार इवाकारो यस्याः यस्यास्तां स्थापयित्वा बहिरिति शेषः ॥२॥३॥४॥५॥६॥ अयं सुंदरः क्रीडार्थो मृगः क्रीडा

१व
१ उमाम०स०

क्षणं च धावत्यवतिष्ठते क्षणं समीपमागत्य पुनर्भयावृतः ॥ एवं समायान्मृगवेषरूपधृक्
चचार सीतां परिमोहयन्खलः ॥४९॥ इति श्रीमदध्यात्मरामायणे आरण्यकांडे षष्ठः सर्गः
॥६॥ ३ श्रीमहादेव उवाच अथ रामोपि तत्सर्वं ज्ञात्वा रावणचेष्टितं ॥ उवाच सीतां मे कांते शृणु जानकि मद्वचः ॥१॥ रा
वणो भिक्षुरूपेण आगमिष्यति तेंतिकं ॥ त्वं तु छायां त्वदाकारां स्थापयित्वोटजे विश ॥२॥ अग्नाव
दृश्यरूपेण वर्षं तिष्ठ ममाज्ञया ॥ रावणस्य वधांते मां पूर्ववत्प्राप्स्यसे शुभे ॥३॥ श्रुत्वा रामोदि
तं वाक्यं सापि तत्र तथाकरोत् ॥ मायासीतां बहिः स्थाप्य स्वयमंतर्दधेनले ॥४॥ मायासीता
तदापश्यन्मृगं मायाविनिर्मितं ॥ हसंती राममभ्येत्य प्रोवाच विनयान्विता ५ पश्य राम मृ
गं चित्रं काननं रत्नभूषितं ॥ विचित्रबिंदुभिर्युक्तं चरंतमकुतोभयं ॥६॥ बद्ध्वा देहि मम क्रीडा
मृगो भवतु सुंदरः ॥ तथेति धनुरादाय गच्छन्लक्ष्मणमब्रवीत् ॥७॥ रक्ष त्वमतियत्नेन सी
तां मत्प्राणवल्लभां ॥ मायिनः संति विपिने राक्षसा घोरदर्शनाः ॥८॥ अतोत्रावहितः साध्वीं
रक्ष सीतामनिंदितां ॥ लक्ष्मणो राममाहेदं देवायं मृगरूपधृक् ॥९॥

रा४

राम०
२०

॥ मृगो भवत्वित्यन्वयः ॥७॥ मा

यिनः छलकर्त्तारः ॥ ९ ॥ अवहितः सावधानमृगरूप मृगयं मारीच एव न मृगोत्र न संदेहोत एतदुद्देशेन मायाः एवंभूतो मृग कुतो न कुतो न कुत्रादिर्गमिष्यामीत्यादेः ॥ ११ ॥ जगदाकृतिः जगद्रूपेण परिणममात्रा ॥ १२ ॥ हरिः रामः इति स्वभक्तवचः सत्यं कर्त्तुं मारीचं जानंनपि सीताप्रियार्थाय सीताप्रियरूपमर्थमुद्दिश्य मृगं ययौ आनु

मारीचोत्र न संदेह एवंभूतो मृगः कुतः ॥ श्रीरामउवाच ॥ यदि मारीच एवायं तदा हन्मि न संशयः ॥ मृगश्चेदानयिष्यामि सीताविश्रामहेतवे ॥ १० ॥ गमिष्यामि मृगं बध्वा ह्यानयिष्यामि सत्वरः ॥ त्वं प्रयत्नेन संतिष्ठ सीतासंरक्षणोद्यतः ॥ ११ ॥ इत्युक्त्वा प्रययौ रामो मायामृगमनुद्रुतः ॥ माया यदाश्रया लोकमोहिनी जगदाकृतिः ॥ १२ ॥ निर्विकारश्चिदात्मापि पूर्णोपि मृगमन्वगात् ॥ भक्तानुकंपी भगवानिति सत्यं वचो हरिः ॥ १३ ॥ कर्त्तुं सीताप्रियार्थाय जानन्नपि मृगं ययौ ॥ अन्यथा पूर्णकामस्य रामस्य विदितात्मनः ॥ १४ ॥ मृगेप्सा वा स्त्रिया वापि किं कार्यं परमात्मनः ॥ कदाचिद्दृश्यतेभ्यासे क्षणं धावति लीयते ॥ १५ ॥ दृश्यते च ततो दूरे देवं राममपाहरत् ॥ १६ ॥

ऽऽपयाविस्पर्थः अत्र मारीचस्य रामान्मरणं श्रेय इति जानतः स्वस्मिन्प्रेमवत्तया स्वभक्तत्वं निर्णीय तस्य तं मनोरथं पूरयितुं रावणस्य च पूर्वं विचारेण निर्णीतिभक्तस्य मनोरथं

रा०अ०आ० पूरयितुं तदनुकंपया गत इति तात्पर्यं ॥१३॥१४॥ अभ्यासे समीपे ॥१५॥१६॥१७॥१८॥ राममद्वाचा रामवाक्यतुल्य
२१ वाचा ॥१९॥ स च भगवत्सायुज्यं प्राप्त इत्याह ॥ यदिति तं पश्यन् तेन हतोसुरः सायुज्यं प्राप्त इति किमुत
वक्तव्यमिति शेषः ॥२०॥ तदेव स्पष्टमाह तद्देवाँहादिति तस्य रामप्रवेशं दृष्ट्वा देवाः परमं विस्मयं आश्चर्यं
पुः राममहिमाविषये इति शेषः ॥२१॥ तद्देवाह ॥ किमिति किं प्राप्तः किंफलं प्राप्तः ॥२२॥ रामभयादेव सर्वं

ततो रामोपि विज्ञाय राक्षसोयमिति स्फुटं ॥१७॥ विव्याध घोरमादाय राक्षसं मृगरूपिणं ॥
पपात रुधिराक्तास्यो मारीचः पूर्वरूपधृक् ॥१८॥ हा हतोस्मि महाबाहो त्राहि लक्ष्मण मां
द्रुतं ॥ इत्युक्त्वा रामवद्वाचा पपात रुधिराशनः ॥१९॥ यन्नाममात्रोपि मरणे स्मृत्वा तत्साम्य
माप्नुयात् ॥ किमुताग्रे हरिं पश्यन् तेनैव निहतोसुरः ॥२०॥ तद्देहादुत्थितं तेजः सर्वलोकस्य
पश्यतः ॥ राममेवाविशद्देवा विस्मयं परमं ययुः ॥२१॥ किं कर्म कृत्वा किं प्राप्तः पातकी मुनिहिं
सकः ॥ अथवा राघवस्यायं महिमानात्र संशयः ॥२२॥

॥ गृहादिकं परित्यज्य पूर्वमपि रामं स्मर राम०
न्स्थित इति शेषः ॥२३॥ तादृशः सततस्मृति दूरीकृताशेषपापोंते रामेण निहतो रामं पश्यन् राममेव स २१
र्वसाधनमिति मंतव्यं ॥२४॥२५॥२६॥ किं ममार एवं किमर्थं मृतः किं भवेत्किमवस्था भवेत् ॥२७॥२८॥ भीता

भीतेवेस्पर्थ्यः यद्वास्यामायासीताह्यातन्मायपयैववास्तवीमितिं ॥ २९ ॥ ततरामवाक्यंनतस्यभयलेशाभा
वात् किंतु म्रियमाणस्य राक्षसस्येदं वचः तदेवाह रामइति ॥ ३० । ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ स्ववाहुभ्यामात्मानंव

रामबाणेन संविद्धः पूर्वं राममनुस्मरन् ॥ भयात्सर्वं परित्यज्य गृह वित्तादिकं च यत् ॥ २३ ॥ हृदि रा
मं सदा ध्यात्वा निर्धूताशेषकल्मषः ॥ अंते रामेण निहतः पश्यन् राममवाप सः ॥ २४ ॥ द्विजो वा
राक्षसो वापि पापी वा धार्मिकोपि वा ॥ त्यजन्कलेवरं रामं स्मृत्वा याति परं पदं ॥ २५ ॥ इति ते
न्योन्यमाभाष्य ततो देवा दिवं ययुः ॥ रामस्तच्चिंतयामास म्रियमाणे सुराधमः ॥ २६ ॥ हा ल
क्ष्मणेति मद्वाक्यमनुकुर्वन्ममार किं ॥ श्रुत्वा मद्वाक्यसदृशं [illegible] क्यं सीतापि किं भवेत् ॥ २७ ॥
इति चिंतापरीतात्मा रामो दूरान्न्यवर्त्तत ॥ सीता तद्भाषितं श्रुत्वा मारीचस्य दुरात्मनः ॥ २८ ॥
भीताति दुःखसंविग्ना लक्ष्मणं त्विदमब्रवीत् गच्छ लक्ष्मण वेगेन भ्राता तेऽसुरपीडितः २९
हा लक्ष्मणेति वचनं भ्रातुस्तेन श्रुणोषि किं ॥ तामाह लक्ष्मणो देवि रामवाक्यं न तद्भवेत् ॥
३० ॥ यः कश्चिद्राक्षसो देवि म्रियमाणोब्रवीद्वचः ॥ रामस्त्रैलोक्यमपि यः क्रुद्धो नाशयति क्ष
णात् ॥ ३१ ॥ स कथं दीनवचनं भाषतेऽमरपूजितः ॥ क्रुद्धा लक्ष्मणमालोक्य सीता बाष्पविलो
चना ॥ ३२ ॥

ष्यमाना ताडयमाना हृरोदकर्णौ पिधाय ईदृशं पापमेवावदतीति तस्य श्रवणायोग्य ॥ ॥

वा ५

त्वात्कर्णौ पिधानं ॥ ३६ ॥ नाशामर्शनं ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ते प्रियं त्वद्योगात्तिष्य करणेनेति शेषः ॥ ४१ ॥ ततः त्वद

माह लक्ष्मण दुर्बुद्धे भ्रातुर्व्यसनमिच्छसि ॥ प्रेषितो भरतेनैव रामनाशनिकांक्षिणा ॥ ३३ ॥ मां ने
तुमागतोसि त्वं रामनाशेउपस्थिते ॥ न मां स्पृशेत्वं मामद्य पश्य प्राणांस्त्यजाम्यहं ॥ ३४ ॥ न जाना
तीह मां रामस्त्वां भार्याहरणेप्सितं ॥ रामादन्यं न स्प्रक्ष्यामि त्वां वा भरतमेव वा ॥ ३५ ॥ इत्युक्त्वा वध्य
मानासा स्वबाहुभ्यामुरो दह ॥ तच्छ्रुत्वा लक्ष्मणः कर्णौ पिधायातीव दुःखितः ॥ ३६ ॥ मामेवं
भाषसे चंडि धिक्त्वां नाशमुपैष्यसि ॥ इत्युक्त्वा वनदेवीभ्यः समर्प्य जनकात्मजां ॥ ३७ ॥ ययौ दुः
खातिसंविग्नो राममेव शनैःशनैः ॥ ततोंतरं समालोक्य रावणो भिक्षुवेषधृक् ॥ ३८ ॥ सीतासमी
पमगमत्स्फुरद्दंडकमंडलुः ॥ सीता तमवलोक्याशु नत्वा संपूज्य भक्तितः ॥ ३९ ॥ कंदमूलफ
लादीनि दत्वा स्वागतमब्रवीत् ॥ मुने भुंक्ष्व फलादीनि विश्रमस्व यथासुखं ॥ ४० ॥ इदानीमेव
भर्त्ता मे ह्यागमिष्यति ते प्रियं ॥ करिष्यति विशेषेण तिष्ठ त्वं यदि रोचते ॥ ४१ ॥ भिक्षुरुवाच ॥
कात्वं कमलपत्राक्षि को वा भर्त्तति वानघे ॥ किमर्थमत्र ते वासो वने राक्षससेविते ॥ ४२ ॥
ब्रूहि भद्रे ततः सर्वं स्ववृत्तांतं निवेदय ॥ सीतोवाच ॥ अयोध्याधिपतिः श्रीमान् राजा दशर
थो महान् ॥ तस्य ज्येष्ठः सुतो रामः सर्वलक्षणलक्षितः ॥ ४३ ॥

॥ नांतश्रवणानंतरं ४२ ॥ ४३ ॥ ॥०॥

४४॥४५॥त्वां पुरं स्वनगरं लंकारूपं नेतुमागत इत्यन्वयः॥४६॥४७ यत यस्मात् एवं भाषसे तत् ततो राघवा
न्नाशमेष्यसि॥४८॥सहानुजो राम आगमिष्यतीति स्वन्वयः॥हरे सिंहस्य शशकः क्षुद्रमृगाः॥४९॥५०॥५१॥

तस्याहं धर्मतः पत्नी सीता जनकनंदिनी ॥तस्य भ्राता कनीयांश्च लक्ष्मणो भ्रातृवत्सलः
४४॥पितुराज्ञां पुरस्कृत्य दंडकेवनमागतः॥चतुर्दश समास्त्वां तु ज्ञातुमिच्छामि मे वद॥४५॥
भिक्षुरुवाच॥पौलस्त्यतनयोहं तु रावणो राक्षसाधिपः॥त्वत्कामपरितप्तोहं त्वां नेतुं पुरमाग
तः॥४६ मुनिवेषेण रामेण किं करिष्यसि मां भज॥भुंक्ष्व भोगान्मया सार्धं त्यज दुःखं वनोद्भ
वं॥४७॥श्रुत्वा तद्वचनं सीता भीता किंचिद्वचाच तं॥यदेवं भाषसे मां त्वं नाशमेष्यसि राघवा
त्॥४८॥आगमिष्यति रामोपि क्षणं तिष्ठ सहानुजः॥मां कोधर्षयितुं शक्तो हरेर्भार्यां शशो
यथा॥४९॥रामबाणैर्वि [illegible] भिन्नस्त्वं पतिष्यसि महीतले॥इति सीतावचः श्रुत्वा रावणः क्रोध
मूर्छितः॥५०॥स्वरूपं दर्शयामास महापर्वतसन्निभं॥दशास्यं विंशतिभुजं कालमेघसमद्यु
तिं॥५१॥दृष्ट्वा वनदेवाश्च भूतानि चेबितत्रसुः॥ततो विदार्य धरणीं नखैरुद्धस बाहुभिः॥५२॥
तोलयित्वा रथे क्षिप्त्वा ययौ क्षिप्रं विहायसा॥हा राम हा लक्ष्मणेति रुदंती जनकात्मजा॥५३॥

तत रावणः स्वरूपं नखैर्धरणीं विदार्य भूसंवरुद्धायाश्चालयितुमशक्यत्वात् बाहुभिस्तामुद्धृत्य भुवः सकाशादु

परिकल्ता॥५२॥तोलयित्वा बाहुभ्यां भारमनुमा
य॥५३॥

रा०अ०आ पश्यंती आसीदिति शेषः ॥५४॥५५॥ मंत्रपूतं पुरोशंडा मुषित्वा शुनक इव लोकनाथस्य रामस्य भार्यां हृत्वा मम अग्र
२२ तः को गच्छतीत्यन्वयः ॥५६॥५७॥५८॥ अन्यरथेन मायाकल्पितेन सीतामादायागच्छदिति शेषः ५९ क्रोशंतं

भयोद्विग्नमना दीना पश्यंती भुवमेव सा ॥ श्रुत्वा तत्क्रंदितं दीनं सीतायाः पक्षिसत्तमः ॥५४॥ ज
टायुरुत्थितः शीघ्रं नगाग्रात्तीक्ष्णतुंडकः ॥ तिष्ठ तिष्ठेति तं प्राह को गच्छति ममाग्रतः ॥५५॥ मुषि
त्वा लोकनाथस्य भार्यां शून्याद्गनाल्लयात् ॥ शुनको मंत्रपूतं वै पुरोडाशमिवाध्वरे ॥५६॥ इत्यु
क्त्वा तीक्ष्णतुंडेन चूर्णयामास तद्रथं ॥ बाहान् बिभेद पादाभ्यां चूर्णमास तद्धनुः ॥५७॥ ततः सी पा ४
तां परित्यज्य रावणः खड्गमाददे ॥ चिच्छेद पक्षौ सामर्षः पक्षिराजस्य धीमतः ॥५८॥ पपात किं
चिच्छेषेण प्राणेन भुवि पक्षिराट् ॥ पुनरन्यरथेनाशु सीतामादाय रावणः ॥५९॥ क्रोशंती रा
मरामेति त्रातारं नाधिगच्छति ॥ हा राम हा जगन्नाथ मां न पश्यसि दुःखितां ॥६०॥ रक्षसानीय
मानां त्वां भार्यां मोचय राघव ॥ हा लक्ष्मण महाभाग त्राहि मामपराधिनीं ॥६१॥ वाक्शा
रेण हतस्त्वं मे क्षंतुमर्हसि देवर ॥ इत्येवं क्रोशमानां तां रामागमनशंकया ॥६२॥ जगाम वायुवे रा०म०
गेन सीतामादाय सत्वरः ॥ विहायसा नीयमाना सीता पश्यद्धोमुखी ॥६३॥ रामः रामः ॥ २२

ती सीता मां न पश्यसि मां किं न पश्यसीत्यर्थः ॥ एवंवलित्वायेति शेषः ॥६०॥६१॥६२॥६३॥

आभरणादिकं विमुच्य उत्तरीयार्धखंडेन बध्वा रामापकर्षयंतिति पर्वते चिक्षेप अनेन स्त्रीचरित्रस्याश
क्यवक्तव्यता सूचिता ॥६४॥ रहसि एकांते गुप्तदेशे ६५ अनुपालयत् अन्वपालयदित्यर्थः आउभावआ

पर्वताग्रे स्थितान् पंच वानरान्वारिजानना । उत्तरीयार्धखंडेन विमुच्याभरणादिकं ॥६४॥ बध्वा
चिक्षेप रामायकेथयंत्विति पर्वते । ततः समुद्रमुल्लंघ्य लंकां गत्वा स रावणः ॥६५॥ स्वां
तःपुरे रहस्येतामशोकविपिने क्षिपत् ॥ राक्षसीभिः परिहृतां मातृबुध्यानुपालयत् ६६ कृ
शातिदीना परिकर्मवर्जिता दुःखेन शुष्यद्वदनातिविह्वला ॥ हा राम रामेति विलिप्यमानासी
तास्थिता राक्षसिवृंदमध्ये ॥६७॥ इति श्री आरण्यकांडे सप्तमः सर्गः ॥७॥ रामो मायाविनं ह
त्वा राक्षसं कामरूपिणं ॥ प्रतस्थे स्वाश्रमं गंतुं ततो दूरं ददर्श तं ॥१॥ आयांतं लक्ष्मणं दी
नं मुखेन परिशुष्यता ॥ राघवश्चिंतयामास स्वात्मन्येवं महामतिः ॥२॥ लक्ष्मणस्तन्न जाना
ति मायासीतां मयाहृतां ॥ ज्ञात्वाप्येनं वंचयित्वा शोचामि प्राहृतो यथा ॥३॥ यद्यहं विर
तो भूत्वा तूष्णीं स्यास्वामिंमदिरे ॥ तदा राक्षसकोटीनां वधोपायः कथं भवेत् ॥४॥

र्थः ॥६६॥ परिकर्म शरीरसंस्कारादिः ॥६७॥ इति अध्यात्मरा० आ० स० ॥७॥ राम इति तं सीतारहत्वेन स्वयं स्था
पितं लक्ष्मणमित्यर्थः ॥१॥ स्वात्मनि स्वचित्ते ॥२॥ ननु लक्ष्मणो यद्यपि न जानाति तथापि त्वं जानास्येव तत्राह ज्ञा

त्वापीति ॥३॥ तादृशशोकफलमाह यद्यहमि
ति ॥४॥

असुरालयं लंकां ॥५॥ नीत्वा प्राप्य अयोध्यां याता गंता एतत्किमर्थं ज्ञानगोपनं तत्राह ब्रह्मणा प्रार्थितो हं मनुष्यभावेन जातो
स्मि एवं च तभ्दावसंरक्षायैतदिति भावः ॥६॥ ननु रावणवधोत्तरं पुनरयोध्यागमनेन तत्र स्थानेन वा न फलं तत्राह म
नुष्यभावमिति भक्तमुक्तिरेव तत्फलमिति भावः ॥७॥८॥ नीतावेति आवयोरसांनिध्येऽवश्यमेव ममवस्था प्राप्तेति

यदि शोचामि तां दुःखसंतप्तः कामुको यथा ॥ तदा क्रमेणानुचिन्वन्सीतां यास्ये सुरालयं ॥ राव
णं सकुलं हत्वा सीतामग्नौ स्थितां पुनः ॥५॥ मयैव स्थापितां नीत्वा यातायोध्यामतंद्रितः ॥ अ
हं मनुष्यभावेन जातोस्मि ब्रह्मणार्थितः ॥६॥ मनुष्यभावमापन्नः किंचित्कालं वसामि कौ॥ त
तो मायामनुष्यस्य चरितं मेनुशृण्वतां ॥७॥ मुक्तिः स्यादप्रयासेन भक्तिमार्गानुवर्त्तिनां ॥ निश्चि
त्यैवं तदा दृष्ट्वा लक्ष्मणं वाक्यमब्रवीत् ॥८॥ किमर्थमागतोसि त्वं सीतां त्यक्त्वा मम प्रियां ॥ नी
ता वा भक्षिता वापि राक्षसैर्जनकात्मजा ॥९॥ लक्ष्मणः प्रांजलिः प्राह सीताया दुर्वचो रुदन् ॥
हा लक्ष्मणेति वचनं राक्षसोक्तं श्रुतं तया ॥१०॥ त्वद्वाक्यसदृशं श्रुत्वा मां गच्छेति त्वराब्रवी
त् ॥ रुदती सा मया प्रोक्ता देवि राक्षसभाषितं ॥ नेदं रामस्य वचनं स्वस्थाभव शुचिस्मिते ॥११॥

भावः ॥९॥१०॥११॥ मया सांत्विता मां प्रोवाचेत्यन्वयः ॥ यद्रुक्तं सीतयेति शेषः ॥१२॥ तथापि स्त्रीस्वभावादेवं तदु
क्तावपि ॥१३॥ सत्सं हत्वा सत्समत्वेत्यर्थः ॥ यत्स्वभानं नांसक्तगतं तदनुचिंतं हतमित्यन्वयः ॥१४॥१५॥ मद्विमोहा

र्यं मम मोहार्थं क्वचित् विलीयसे किमिति पर्यः॥१६॥ आचिन्वत् अन्वेषयत्॥ कुतः कुत्रेसर्यः क्वचित् कुत्रे सेव पाठः॥१७॥ मृगादित्यादि संबोधनानि न कुत्र चित्॥ ददर्श इति शेषः॥१८॥ सर्वथा सर्वप्रकारेण पश्यन्नपि क्वापि दे

इत्येवं सा त्विता साध्वी मया प्रोवाच मां पुनः॥ यदुक्तं दुर्वचो राम मनवाच्यं पुरतस्तव॥१२॥ कर्णौ पिधाय निर्गत्य यातोहं त्वां समीक्षितुं॥ रामस्त्वलक्ष्मणं प्राह तथाप्यनुचितं कृतं॥१३॥ त्वया स्त्रीभाषितं सत्यं कृत्वा त्यक्त्वा शुभाननां॥ नीता वा भक्षिता वापि राक्षसैर्नीत्र संशयः॥१४॥ इति चिंतापरो रामः स्वाश्रमं त्वरितो ययौ॥ तत्राहृष्ट्वा जनकजां विललापातिदुःखितः॥१५॥ हा प्रिये क्व गतोसि त्वं नासि पूर्ववदाश्रमे॥ अथवा मद्विमोहार्थं लीलया क्व विलीयसे॥१६॥ इत्याचिन्वन्वनं सर्वं नापश्यज्जानकीं तदा॥ वनदेव्यः कुतः सीतां ब्रुवंतु मम वल्लभां॥१७॥ मृगाश्च पक्षिणो वृक्षा दर्शयंतु मम प्रियां॥ इत्येवं विलपन्नेव रामः सीतां न कुत्र चित् १८॥ सर्वज्ञः सर्वथा क्वापि नापश्यद्रघुनंदनः॥ आनंदोप्यन्वशोचत्तामचलोप्यनुधावति॥१९ निर्ममो निरहंकारोप्यखंडानंदरूपवान्॥ मम जायेति सीतेति विललापातिदुःखितः॥२०॥ एवं मायामनुचरन्नसक्तोपि रघूत्तमः॥ आसक्त इव मूढानां भाति तत्वविदां न हि॥२१॥

शेनापश्यन्॥ यदानंदस्तन्मयः सर्वशक्तिसम्पन्नोवा तामन्वशोचत्तदचलोप्यनुधावतीत्यकर्तृकः शोको चलकर्तृकधावनं तदत्याश्चर्यमिति भावः॥१९

निर्ममत्वात्पितृगुणोपि मम जायेति विललाप मायामनुष्यगृहीतमनुष्यत्वस्य लोकानुसरणत्वेन प्रलापमितुमि
तिभावः अतिदुःखितः स एव ॥२०॥ तद्देवाह एवमिति ॥ असक्तोपि ॥ आसक्तिरहितोपि ॥२१॥ छत्रचापमित्रभग्नमित्य
नुकर्षः ॥२२॥ नीयमानां जनकजां दृष्ट्वाऽन्यरतं जित्वा तां जहार तच्चिन्हमिदं पश्येत्यन्वयः ॥२३॥ पर्वतसंनिभं त

एवं विचिन्वन्सकलं वनं रामः सलक्ष्मणः ॥ भग्नं रथं छत्रचापं कूबरं पतितं भुवि ॥२२॥ दृष्ट्वा ल
क्ष्मणमाहेदं पश्य लक्ष्मण केनचित् ॥ नीयमानां जनकजां तं जित्वान्योजहार तां ॥२३॥ ततः
किंचिद्भुवोभागं गत्वा पर्वतसन्निभं ॥ रुधिराक्तवपुर्दृष्ट्वा रामो वाक्यमथाब्रवीत् ॥२४॥ एष
वै भक्षयित्वा तां जानकीं शुभदर्शनां ॥ शेते विविक्तेतित्वेसः पश्य हन्मि निशाचरं ॥२५॥ चाप
मानय शीघ्रं मे बाणांश्च रघुनंदन ॥ तच्छ्रुत्वा रामवचनं जटायुः प्राह भीतवत् ॥२६॥ मां न मारय
भद्रं ते म्रियमाणं स्वकर्मणा ॥ अहं जटायुस्ते भार्याहारिणं समनुद्रुतः ॥२७॥ रावणं तत्र युद्धमे
बभूवारिविमर्दन ॥ तस्य वाहान्रथं चापं छित्वाहं तेन घातितः ॥२८॥ पतितोस्मि जगन्नाथ प्रा
णांस्त्यक्ष्यामि पश्य मां ॥ तच्छ्रुत्वा राघवो दीनं कंठप्राणं ददर्श ह ॥२९॥ हस्ताभ्यां संस्पृशन् रामो
दुःखाश्रुवृतलोचनः ॥३०॥

९ त्सदृशं रुधिराक्तवपुरिति कर्मधारयः विविक्ते एकांते ॥२५॥२६॥२७॥ राव
णमिति पूर्वान्वयि छित्वा स्थितोहमित्यन्वयः ॥२८॥ २९ ॥ म्रियमाणेन मे ममेत्यर्थः ॥३४॥ पुनः स्पृशेत्यन्वयः

येनस्पर्शेन ते पदं यास्यामीत्यन्वयः ॥३५॥ स्मयन् पक्षिणोप्येवं पराक्रम एवंज्ञानमित्याश्चर्यवान् ॥३६॥ बंधु

जटायो ब्रूहि मे भार्या केन नीता शुभानना ॥ मत्कार्यार्थं हतोसि त्वमतो मे प्रियबांधवः ॥३१॥
जटायुः सन्नया वाचा वक्त्राद्रक्तं समुद्वमन् ॥ उवाच रावणो राम राक्षसो भीमविक्रमः ॥३२॥ आ
दाय मैथिलीं सीतां दक्षिणाभिमुखो ययौ ॥ इतो वक्तुं न मे शक्तिः प्राणांस्त्यक्ष्यामि तेग्रतः
३३॥ दिष्ट्या दृष्टोसि राम त्वं म्रियमाणेन मेनघ ॥ परमात्मासि विष्णुस्त्वं मायामनुजरूपधृक्
३४॥ अंतकालेपि दृष्ट्वा त्वां मुक्तोहं रघुसत्तम ॥ हस्ताभ्यां स्पृश मां राम पुनर्यास्यामि ते पदं ॥ त
थेति रामः पस्पर्श तदंगं पाणिना स्पृशन् ॥ ततः प्राणान्परित्यज्य जटायुः पतितो भुवि ॥३६॥
रामस्तमनुशोचित्वा बंधुवत्साश्रुलोचनः ॥ लक्ष्मणेन समानाय्य काष्ठानि प्रददाह तं ॥३७॥
स्नात्वा दुःखेन रामोपि लक्ष्मणेन समन्वितः ॥ हत्वा वने मृगं तत्र मांसखंडान्समंततः ॥३८॥
शाद्वले प्राक्षिपद्रामो ट्पकूट्पगने क्षुधा ॥ भक्षंतु पक्षिणः सर्वे तृप्तो भवतु पक्षिराट् ॥३९॥
इत्युक्त्वा राघवः प्राह जटायो गच्छ मत्पदं ॥ मत्सारूप्यं भजस्वाद्य सर्वलोकस्य पश्यतः ॥४०॥
ततोनंतरमेवासौ दिव्यरूपधरः शुभः ॥ विमानवरमारुह्य भास्वरं भानुसन्निभं ॥४१॥ रामः ॥

वदनुशोचित्वा अनेन तिरश्चामपि मीत्सा दाहौचित्यमिति दर्शितं ॥३७॥३८॥ भक्षंतु भक्षयंतु ॥३९॥ इत्युक्त्वा इ

ति संकल्प ॥४०॥४१॥

द्योतयन् आकाशमिति शेषः राममाभाष्य रामं संबोध्य॥४३॥ अगणितगुणं अनंतशक्तित्वात् अप्रमेयं दे
शकालापरिच्छेद्यं संयमो नाशः आदिना जन्म उपरमः शांतिरेव परमा शोभा यस्मिन् तं॥४४॥ निरवधिसुखं
तदतिरिक्तेषु ब्रह्मांतेषु सुखं सावधिकमिति भावः॥ इंदिरा लक्ष्मीस्तत्कटाक्षा यस्मिंस्तं सुरेंद्रादिसेवाभीतेन

३जटायुरुवाच॥

शंखचक्रगदापद्मकिरीटवरभूषणैः॥ द्योतयन् स्वप्रकाशेन पीतांबरधरो मतः॥४२॥ च
तुर्भिः पार्षदैर्विष्णोस्तादृशैरभिपूजितः॥ स्तूयमानो योगिगणै राममाभाष्य सत्वरः॥४३॥ कृ
तांजलिपुटो भूत्वा तुष्टाव रघुनंदनं॥ अगणितगुणमप्रमेयमाद्यं सकलजगत्स्थितिसंयमा
दिहेतुं॥ उपरमपरमं परात्मभूतं सततमहं प्रणतोस्मि रामचंद्रं॥४४॥ निरवधिसुखमिंदिरा
कटाक्षं क्षपितसुरेंद्रचतुर्मुखादिदुःखं॥ नरवरमनिशं नतोस्मि रामं वरदमहं वरचापबाण
हस्तं॥४५॥ त्रिभुवनकमनीयरूपमीड्यं रविशतभासुरमीहितप्रदानं॥ शरणदमनिशं सुराग
मूले कृतनिलयं रघुनंदनं प्रपद्ये॥४६॥ भवविपिनदवाग्निनामधेयं भवमुखदैवतदैवतं
दयालुं॥ दनुजपतिसहस्रकोटिनाशं रवितनयासदृशं हरिं प्रपद्ये॥४७॥

॥येन तदीयदुःखं क्ष
पितमित्यर्थः॥४५॥ ईहितप्रदानं भक्तेहितदानं स्वभावं सुरागमूले शोभनो रागः प्रीतिस्तस्य मूलमाश्रयाश्रितं
तत्र कृतस्थानं॥४६॥ भवविपिनस्य दवाग्निभूतं नामधेयं यस्य तं रवितनया यमुना तत्सदृशं तद्वर्णं॥४७

अविरतंभवस्यसंसारस्यभावनायेषांतेषामतिदूरः भवसमुद्रस्यसुतारणांघ्रिरूपः पोतोयस्यतं॥४८॥गिरिशः
शिवः गिरिसुतापार्वतीतयोर्मनसिनिवासोयस्यतंगिरीवरधारिणं अयमेवकृष्णोभावीतिभावः॥हरितैश्चे
ष्टितैरभिरामंअभिरामचेष्टितमितियावत्सुरगणांवरदं॥४९॥परगुणादिषुतुष्टभीर्ष्यारहितमानसंये

अविरतभवभावनातिदूरं भवविमुखैर्मुनिभिः सदैवदृश्यं॥भवजलधिसुतारणांघ्रिपो
तंशरणमहंरघुनंदनंप्रपद्ये॥४८॥गिरिशगिरिसुतामनोनिवासंगिरिवरधारिणमी
हिताभिरामं॥सुरवरदनुजेंद्रसेवितांघ्रिं सुरवरदंरघुनायकंप्रपद्ये॥४९॥परधनपरदा
रवर्जितानांपरगुणभूतिषुतुष्टमानसानां॥परहित निरतात्मनांसुसेव्यंरघुवरमंबुज
लोचनंप्रपद्ये॥५०॥स्मितरुचिरविकासिताननाब्जं अतिसुलभंसुरराजनीलनीलं॥सि
त जलरुहचारुनेत्रशोभंरघुपतिमीशगुरो र्गुरुंप्रपद्ये॥५१॥हरिकमलजशंभुरूप
मेशतत्त्वमिहविभासिगुणैश्च यानुवृत्तः॥रविरिवजलपूरितोदपात्रेष्वमरपतिस्तुति
पात्रमीशमीडे॥५२॥

॥षां॥५०॥अस्मितेनेषद्धासेनरुचिरंविकासितमाननाब्जंयस्यसुरराजनील
इंद्रनीलमणिः ईशगुणैर्लक्षणैः॥५१॥यथैकोपिरविरुदपात्रेष्वनेकइवएवमेकोपित्वंगुणभेदाद्रूपादिसं
ज्ञकः॥अमरपतिरिंद्रस्तस्यस्तुतिपात्रंतत्कृतस्तुतिविषयइत्यर्थः॥५२॥ ॥०॥ ॥०॥ ॥०॥

रतिपतिः कामस्ततोपि शतकोटिगुणं सुंदरमंगं यस्य शतपथो माध्यंदिनानां ब्राह्मणं तद्गोचरणतत्रोक्तप्रकारया
भावनयाप्यविदूरं लक्ष्यमिति यावत् तदेवाह यतिपतीत्यादि ॥५३॥५४॥ ब्रह्मसुपूजितं तत्पदं वैकुंठं ॥५६॥ इ
ति रामायणे० टीकायामष्टमः सर्गः ॥८॥ विपिनांतरं अन्यद्वनं दुःखं समाश्रित्य अभिनीय ॥१॥ अद्भुतसमा

रतिपतिशतकोटिसुंदरांगं शतपथगोचरभावनाविदूरं ॥ यतिपतिहृदये सदा विभातं रघु
पतिमार्त्तिहरं प्रभुं प्रपद्ये ॥५३॥ इत्येवं स्तुवतस्तस्य प्रसन्नोभूद्रघूत्तमः ॥ उवाच गच्छ भद्रं ते
मम विष्णोः परं पदं ॥५४॥ शृणोति य इदं स्तोत्रं लिखेद्वा नियतः पठेत्॥ स याति मम सारूप्यं
मरणे मत्स्मृतिं लभेत् ॥५५॥ इति राघवभाषितं तदा श्रुतवान् हर्षसमाकुलो द्विजः ॥ रघुनं
दनसाम्यमास्थितः प्रययौ ब्रह्मसुपूजितं पदं ॥५६॥ इति श्रीमदध्यात्मरामायणे आरण्यकां
६ श्रीमहादेव उवाच ॥ डे अष्टमः सर्गः ॥८॥ ततो रामो लक्ष्मणेन जगाम विपिनांतरं ॥ पुनर्दुःखं समाश्रित्य सीतान्वेष
णतत्परः ॥१॥ तत्राद्भुतसमाकारो राक्षसः प्रत्यदृश्यत ॥ वक्षस्येव महावक्त्रश्चक्षुरादिविवर्जि
तः ॥२॥ बाहू योजनमात्रेण व्याप्तौ तस्य रक्षसः ॥ कबंधो नाम दैत्येंद्रः सर्वसत्त्व विहिंसकः
॥३॥ तद्बाह्वोर्मध्यदेशेतौ चरंतौ रामलक्ष्मणौ ॥ ददृशतुर्महासत्त्वं तद्बाहुपरिवेष्टितौ ॥४॥

\\कारः अस्य
र्यकृतिः महद्वक्त्रं यस्य सः ॥२॥ आप्तौ व्यापारवंतौ ॥३॥ ४॥ श्रीरामरामरामरामराम रामरामः रामः

५॥संकलितौ प्राप्तौ॥दीनौ॥आवां॥७॥छिंद्यां छिंधाव इत्यर्थः आर्षमेकवचं॥८॥९॥महाबाहुच्छेदसमर्थौ लोके भूर्लोके कुतः॥असंभावितावेव तथाऽपि विविधमानेषु देवेष्वपि॥असंभावितौ तद्युवां कौ विस्माश्चर्येण प्रश्नः

रामः प्रोवाच विहसन्पश्य लक्ष्मण राक्षसं॥शिरःपादविहीनोऽयं यस्य वक्षसि चाननं॥५॥बाहुभ्यां लभते यद्यत्तत्तद्भक्षन्नुस्थितो ध्रुवं॥आवामप्येतयोर्बाह्वोर्मध्ये संकलितौ ध्रुवं॥६॥गंतुमन्यत्रमार्गेण न शक्यते रघुनंदन॥किं कर्तव्यमितोस्माभिरिहानीं न क्षपेत्तनौ॥७॥लक्ष्मणस्तमुवाचेदं किं विचारेण राघव॥आवामेकैकमव्यग्रौ छिंद्यां रक्षोभुजौ ध्रुवं॥८॥तथेति रामः खड्गेन भुजं दक्षिणमच्छिनत्॥तथैव लक्ष्मणो वामं चिच्छेद भुजमंजसा॥९॥ततोतिविस्मितो दैत्यः कौ युवां सुरपुंगवौ॥महाबाहुच्छेदकौ लोके दिवि देवेषु वा कुतः॥१०॥ततोब्रवीद्धसन्नेव रामो राजीवलोचनः॥अयोध्याधिपतिः श्रीमान्राजा दशरथो महान्॥११॥रामोहं तस्य पुत्रोसौ भ्राता मे लक्ष्मणः सुधीः॥मम भार्या जनकजा सीता त्रैलोक्यसुंदरी॥१२॥आवां मृगयया यातौ तदा केनापि रक्षसा॥नीतां सीतां विचिन्वंतौ चागतौ घोरकानने॥१३॥बाहुभ्यां वेष्टितावत्र तव प्राणरिरक्षया॥छिन्नौ तव भुजौ त्वं च को वा विकटरूपधृक्॥१४॥कबंध उवाच॥

॥१०॥११॥अहं रामस्तस्य पुत्र इत्यन्वयः॥१२॥मृगयया मृगयासक्त्या यातावित्यन्वयः रक्षसा नीतां सीतां विचिन्वंतावित्यन्वयः॥१३॥अत्र तव बाहुभ्यां वेष्टितौ जातौ प्राणरिरक्षया तव भुजौ छिन्नौ स्ववृत्तांतमुक्त्वा तद्वृत्तांतं पृच्छति त्वं च क इति॥१४॥

१६ ॥ वरनार्यः उत्तमस्त्रियः अवध्यत्वं लब्धं मयेति शेषः ॥ १६ ॥ १७ ॥ १८ ॥ तेन यदा ते बाहू विच्छेघेते तदा शापादिनिर्मुक्तो
भविष्यसीति संबंधः ॥ १९ ॥ २० ॥ कदाचिदिति राक्षसतनुं प्राप्तनंतरमिति शेषः ॥ २१ ॥ तदा वज्रेण ताडने शिरः कुक्षिं गत
पादौ च गतौ नष्टाविसनुकर्षः २२ २३ इतोव्रजेति तु रूप्यामेव रिंगन्निति शेषः ॥ २४ ॥ बाहुभ्यां गृहीत्वेति शेषः ॥ २५ ॥ स्व

धन्योहं यदि रामस्त्वमागतोसि ममांतिकं ॥ पुरा गंधर्वराजोहं रूपयौवनदर्पितः ॥ १५ ॥ विचरन्लो
कमखिलं वरनारीमनोहरः ॥ तपसा ब्रह्मणो लब्धमवध्यत्वं रघूत्तम ॥ अष्टावक्रं मुनिं दृष्ट्वा कदा
चिदहसं पुरा ॥ क्रुद्धो सावाह दुष्टत्वं राक्षसोभव दुर्मते ॥ १७ ॥ अष्टावक्रः पुनः प्राह वंदितो मे दयाप
रः ॥ शापस्यांतं च मे प्राह तपसा घोतितप्रभः ॥ १८ ॥ त्रेतायुगे दाशरथिर्भूत्वा नारायणः स्वयं ॥
आगमिष्यति ते बाहू छिघेते योजनायतौ ॥ १९ ॥ तेन शापाद्विनिर्मुक्तो भविष्यसि यथा पुरा ॥ इ
तिशप्तोहमशाक्षं राक्षसीं तनुमात्मनः ॥ २० ॥ कदाचिद्देवराजानमभ्यद्रवमहं रुषा ॥ सोपि वज्रे
ण मां रामे शिरोदेशेभ्यताडयत् ॥ २१ ॥ तदा शिरोगतं कुक्षिं पादौ च रघुनंदन ॥ ब्रह्मदत्तवरान्म
स्तु नोभून्मे वज्रताडनात् ॥ २२ ॥ मुखाभावे कथं जीवेदयमिसमराधिपं ऊचुः सर्वे दयाविष्टा
मां विलोक्यास्यवर्जितं ॥ २३ ॥

॥ आस्ये गतेपि शिरोभागे अग्नीं धनाहृते ॥ अग्नियुक्तें धनावृत्तें २६ ॥ भार्या मार्गं
भार्मल्लिभो पापं ॥ २७ ॥ ततो देहात् दृह्यमाना देहादित्यर्थः कंदर्पसदृशः पुरुषः ॥ उत्थितइत्यर्थः ॥ २८ ॥ २९

अतिसंभ्रमात् अत्यादरात् ॥ अनंतं देशा।परिछेद्यं अनाद्यंतं आद्यंतरहितं तेनकालापरिछेद्यत्वमुक्तं म
नोवाचामिति ॥ यतोवाचानिवर्त्तंते अप्राप्यमनसासहेतिश्रुतेः ॥ ३० ॥ देहद्वयं हिरण्यगर्भविराड्रूपस्थूलं

ततोमांप्राह मघवाञ्जठरेते मुखंभवेत् ॥ बाहूतेयोजनायामौभविष्यतइतोव्रज ॥ २४ ॥ इत्युक्तोऽ
त्रवसन्नित्यंबाहुभ्यांवनगोचरात् ॥ भक्षयाम्यधुनाबाहूखंडितौमेत्वयानघ ॥ २५ ॥ इतः परं
मांश्वभ्रास्येनिक्षिपाग्नींधनावृते ॥ अग्निनादह्यमानोहंत्वयारघुकुलोत्तम ॥ २६ ॥ पूर्वरूपम
नुप्राप्यभार्यामार्गंवदामिते ॥ इत्युक्तेलक्ष्मणेनाशुश्वभ्रंनिर्मायतत्रतं ॥ २७ ॥ निक्षिप्यप्रादह
त्काष्ठैस्ततोदेहात्समुत्थितः ॥ कंदर्पसदृशाकारः सर्वाभरणभूषितः ॥ २८ ॥ रामंप्रदक्षिणांकृत्वा
साष्टांगंप्रणिपत्यच ॥ कृतांजलिरुवाचेदंभक्तिगद्गदयागिरा ॥ २९ ॥ गंधर्वउवाच ॥ स्तोतुमुत्सहते
मेद्यमनोरामातिसंभ्रमात् ॥ त्वामनंतमनाद्यंतंमनोवाचामगोचरं ॥ ३० ॥ सूक्ष्मंतेरूपमव्यक्तं
देहद्वयविलक्षणं ॥ दृग्रूपमितरत्सर्वंदृश्यंजडमनात्मकं ॥ तत्कथंत्वांविजानीयाद्व्यतिरिक्तं
मनःप्रभो ॥ ३१ ॥

॥ सक्ष्मंचततोविलक्षणं दृग्रूपंकेवलज्ञानरूपंतेसूक्ष्मरूपं तदव्यक्तंसर्वथायोगिभि
र्दुर्ज्ञेयंइतरत्सर्वंजडंयतोदृश्यंजगज्जडंदृश्यत्वादिनुनानेनसूचितेविस्तरस्त्वस्मद्गुरुभिर्व्याससूत्रवृत्तौप्रसं
चितःव्यतिरिक्तंजडत्वात् ॥ त्वत्तोभिन्नंमनस्त्वांकथंजानीयादित्यर्थः ॥ ३१ ॥

बुद्धिबिंबितं तत्रात्माभास आत्मप्रतिबिंबस्तयोरैक्यं भेदानवभासस्तद्विषयो जीवः बुध्यादीनां साक्षी अंतर्यामी ब्रह्मैव शुद्धं चैतन्यं
यतो निर्विषये वाङ्मनसोगोचरे तस्मिन्निदमखिलं जगत् ॥ ३२ ॥ अज्ञानवशान्निर्विकारेत्वपि आरोप्यते हिरण्यगर्भः सूक्ष्मदे-
हं सकललिंगदेहसमष्टिरूपत्वात्तस्येति भावः सकलस्थूलसमष्टिर्विराडिति भावः ॥ ३३ ॥ ध्यातॄणां मंगलं स्वपरभरत्वाद्
ततस्ते सूक्ष्मं भावनाविषयः हृदयपुंडरीकादौ ध्येयमिति यावत् यद्विषयभावनायां सिद्धायां भूतभविष्यवर्त्तमानसर्व-
पदार्थज्ञानं भवतीत्याह भूतमित्यादि भव्यं वर्त्तमानं ॥ ३४ ॥ अंडकोशरूपो भगवतो विराट् देहस्तत्र महदादिभिरावृत्ते र

बुध्यात्माभासयोरैक्यं जीव इत्यभिधीयते ॥ बुध्यादिसाक्षी ब्रह्मैव तस्मिन्निर्विषयेऽखिलं ॥ ३२ ॥ आरोप्य-
तेऽज्ञानवशान्निर्विकारेऽखिलात्मनि ॥ हिरण्यगर्भस्ते सूक्ष्मं देहं स्थूलं विराट् स्मृतं ॥ ३३ ॥ भावनाविषयो
राम सूक्ष्मं ते ध्यातृमंगलं ॥ भूतं भव्यं भविष्यच्च यत्रेदं दृश्यते ॥ ३४ ॥ स्थूलेऽण्डकोशे देहे ते महदादि-
२ जगत्
भिरावृते ॥ सप्तभिरुत्तरगुणैर्वैराजो धारणाश्रयः ॥ ३५ ॥

इति अत्रेयं पौराणिकसांख्यसंमता प्रक्रिया स्वव्या-
प्याहंकारायणं दशगुणितं हि महत्तत्वं बाह्यमावरणं तन्मेहंकारावरणं तदपि स्वव्याप्यव्योमावरणं । दशगुणं त-
न्मध्ये व्योमावर्णं तस्य दशगुणितस्य मध्ये वाय्वावरणं तस्यापि दशगुणितस्य मध्ये तेज । आवरणं तेजसो दशगुणित-
स्य मध्ये जलावरणं जलस्य दशगुणस्य मध्ये पृथिव्यावरणं तस्या दशगुणाया मध्ये पृथिवी बीजोद्भवमंडं तस्या-
पि । दशगुणस्यांडस्य मध्ये चतुर्दश भुवनात्मकं स्वयंभुवः स्थूलशरीरं स्वयंभूसंकल्पादेव जायते इति तदाह ।

सप्तभि रू त्तरगुणैरिति उत्तरोत्तरदशगुणैः स्वस्वांतर्गतापेक्षयेत्यर्थः साधारणाश्रयः भ्रूमध्यादिदेशेषु वा भावना
श्रयइत्यर्थः ॥३५॥ तदेव विद्रूपं ध्यानयोग्यं दर्शयति ॥ त्वमेवेति सर्वकैवल्यं सर्वस्य कैवल्यमंते प्राप्यं वस्त्वित्यर्थः लो
कास्तेवयवा इति सामान्यत उक्त्वा तदेव विशेषेणाह पातालमित्यादि पातालं सप्तमोधोलोकः ॥३६॥ तलातलमितीर्य
तइत्यस्य गुल्फोर्ध्वजान्वधोभाग इति शेषः ॥३७॥ अतलेवेत्यस्य ऊर्ध्वंजगानाधोभाग इति शेषः ॥ नाभेरधोभागं जघनं त

त्वमेव सर्वकैवल्यं लोकास्ते वयवाः स्मृताः ॥ पातालं ते पादमूलं पार्ष्णिस्तव महातलं ॥३६॥ रसातलं
ते गुल्फौ तु तलातलमितीर्यते ॥ जानुनी सुतलं राम ऊरू ते वितलं तथा ॥३७॥ अतलं च महीराम जघनं
नाभिगं नभः ॥ उरस्थलं ते ज्योतींषि ग्रीवा ते महउच्यते ॥३८॥ वदनं जनलोकस्ते तपस्ते शंखदेश
गं ॥ सत्यलोके रघुश्रेष्ठ शीर्षण्यपास्ते सदाप्रभो ॥३९॥ इंद्रादयो लोकपाला बाहवस्ते दिशः श्रुती ॥ अ
श्विनौ नासिके राम वक्त्रं तेग्निरुदाहृतः ॥४०॥ चक्षुस्ते सविता राम मनश्चंद्र उदाहृतः ॥ भ्रूभंग एव का
लस्ते बुद्धिस्ते वाक्पतिर्भवेत् ॥४१॥

१ महीपृथ्वीत्यर्थः नभोभुवर्लोकोत्र ज्योतींषि स्वर्गलोकोत्र महर्लोकः
३८ ॥ तपस्तपोलोकः ॥३९॥ श्रुति श्रोत्रे ॥४०॥ कालो निमेषादिपरार्धांतः वाचस्पतिर्बृहतिः ॥४१॥ अहंकारा
श्चित्तं छंदांसि वेदास्ते वाचः वागित्यर्थः ॥ दंष्ट्रदेशेति दंष्ट्रादेशणस्य इत्यर्थः ह्रस्व आर्षः ॥ द्विजालयो दंतपंक्त

१मोहकरी सकलजनमोह

रा०अ०आ० यः ॥४२॥ करी ॥४३॥ निमिषो रात्रिः उन्मेषणं दिवा सप्त समुद्राः कुक्षिस्तव नद्यस्तव नाड्यः ॥४४॥ वृष्टिस्तव रेतः ज्ञान
३० शक्तिस्तव महिमा सर्वत आधिक्यं त्वत्तुल्यज्ञानशक्तिर्नान्यत्रेति भावः ॥४५॥ अतलो अधिकमन्यत्किंचन न
हि किमपि नेत्यर्थः ॥४६॥ सरोमपुलक इत्यनेन प्रेमरस लक्षणमुक्तं येन गात्रे सरोमपुलकता सततप्रेमरसः इ

रुद्रोऽहंकाररूपस्ते वाचश्छंदांसि ते व्ययः ॥ यमस्ते दंष्ट्रदेशस्थो नक्षत्राणि द्विजालयः ॥४१॥ हा
सो मोहकरी माया सृष्टिस्तेपांगमोक्षणं ॥ धर्मः पुरस्तेऽधर्मश्च पृष्ठभागउदीरितः ॥४३॥ निमिषो
२ स्त न्मेषणे रात्रिर्दिवाचैव रघूत्तम ॥ समुद्राः सप्ततेकुक्षिर्नाड्यो नद्यस्तव प्रभो ॥४४॥ रोमाणि वृक्षौष
धयो रेतो वृष्टिस्तव प्रभो ॥ महिमा ज्ञानशक्तिस्ते एवं स्थूलं वपुस्तव ॥४५॥ यदस्मिन्स्थूलरूपे ते
मनः संधार्यते नरैः ॥ अनायासेन मुक्तिः स्यादतोऽन्यन्नहि किंचन ॥४६॥ अतोऽहं रामरूपं ते स्थू
लमेवानुभावये ॥ यस्मिन्ध्याते प्रेमरसः सरोमपुलको भवेत् ॥४७॥ तदैव मुक्तिः स्याद्राम यदा
ते स्थूलभावकः ॥ तदप्यास्तां तवैवाहमेतद्रूपं विचिंतये ॥४८॥ धनुर्बाणधरं श्यामं जटावल्क
लभूषितं ॥ अपीच्यवयसं सीतां विचिन्वंतं सलक्ष्मणं ॥४९॥

॥ दंभूयात् ॥ लब्धं च मानशपतिविंती
छा प्रेमेत्याह ॥४७॥ अयं जीवो यदा ते स्थूलरूपभावको भवति तदैव तस्य मुक्तिः स्यादित्यर्थः ततस्थू
लभावनमप्यास्तां यद्यशक्यं स्तदापि इष्टं तु नैवैतद्रूपमेवाहं विचिंतये चिंतयामि ॥४८॥ तद्रूपमाह धनुरिति

अपीच्यवयसं तारुण्यवयस्कं ४९

रा०म०
३०

एतद्रूपध्यानप्रार्थने हेतुमाह सर्वत इत्यादि एवं त्वद्रूपमे अनुपश्येत्किं धनुरित्यादि एवं च शंकरध्येयत्वादेतद्रूपध्या
नप्रार्थनमिति भावः॥५०॥ ननु मनुष्यस्य मम किमेतत्प्रार्थ्यते इत्याशंक्यापां तस्य परमात्मत्वं युक्त्या साधयति
मुमूर्षुणामिति॥ तारकं ब्रह्मतत्त्वमस्यादिप्रतिपाद्यं तस्य वाचकं प्रतिपादकं॥५१॥ रमंते योगिनोत्रेति व्युत्पत्त्ये

इदमेव सदा मे स्यान्मानसे रघुनंदन॥ सर्वज्ञः शंकरः साक्षात्पार्वत्या सहितः सदा॥५०॥ त्वद्रूप
मेवं सततं ध्यायन्नास्ते रघूत्तम॥ मुमूर्षूणां सदा काश्यां तारकं ब्रह्मवाचकं॥५१॥ राम रामेत्यु
पदिशन्सदा संतुष्टमानसः॥ अतस्त्वं जानकीनाथ परमात्मा सुनिश्चितः॥५२॥ सर्वे ते माय
या मूढास्त्वां न जानंति तत्त्वतः॥ नमस्ते रामभद्राय वेधसे परमात्मने॥५३॥ अयोध्याधि
पते तुभ्यं नमः सौमित्रिसेवित॥ त्राहि त्राहि जगन्नाथ मां माया नावृणोतु ते॥५४॥ श्रीरामउवा
च॥ तुष्टोहं देवगंधर्व भक्त्या स्तुत्या च तेनघ॥ याहि मे परमं स्थानं योगिगम्यं सनातनं॥५५॥
जपंति ये नित्यमनन्यबुद्ध्या भक्त्या त्वदुक्तेस्तवमागमोक्तं॥ ते ज्ञानसंभूतभवं विहाय मायां
ति नित्यानुभवानुमेयं॥ ५६॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे आरण्यकांडे नवमः सर्गः॥९॥ श्रीमहादेवउवाच॥

त्तिभावः॥५२॥ त्वां न जानंति परमात्मत्वेनेत्यर्थः॥५३॥५४॥ योगिभिरनेनैव देनं योगबलात्तु गम्यं स्वलोकं ५५ नि
त्यानुमेयं नित्यं योनुभवो ज्ञानं तत्तद्वस्तुविषयं तेनानुमेयं तदुक्तं भगवद्गीतायां सर्वस्य चाहं हृदि संनिविष्टो मत्तः

स्मृतिर्ज्ञानमपोहनं चेति॥५६॥ इति अध्या
त्मरामायणे आ० नवमः सर्गः॥९॥ छ॥

प्रयास्यन् स्वस्थानमितिशेषः॥ पुरोभागे दृश्यमाने आश्रमे त्वच्चरणभक्तिमार्गविशारदा शबरी आस्ते सर्वं
सीतावस्थितिस्थानं तत्मा भुयापंचेत्यर्थः॥१॥२॥ विष्णोः पदं स्वर्लोकं॥३॥४॥ अचिरेण शीघ्रं॥५॥ पादयोर
ग्रे तदंत्यभागे स्वासने शोभने आसने॥६॥ आदृता अर्घ्यादिभिस्तद्रूपा या॥७॥ सपर्यया पूजा सामग्री रामं संपूज्य

लब्ध्वा वरं स गंधर्वः प्रयास्यन् राममब्रवीत्॥ शबर्यास्ते पुरोभागे आश्रमे रघुनंदन॥१॥ भक्त्या
त्वत्पादकमले भक्तिमार्गविशारदा॥ तां प्रयाहि महाभाग सर्वं ते कथयिष्यति॥२॥ इत्युक्त्वा प्रय
यौ सोपि विमानेनार्कवर्चसा॥ विष्णोः पदं रामनामस्मरणे फलमीदृशं॥३॥ त्यक्त्वा तद्विपिनं
घोरं सिंहव्याघ्रादिदूषितं॥ शनैरथाश्रमपदं शबर्या रघुनंदनः॥४॥ शबरी राममालोक्य
लक्ष्मणेन समन्वितं॥ आयांतमाराद्धर्षेण प्रत्युत्थायाचिरेण सा॥५॥ पतित्वा पादयोरग्रे
हर्षपूर्णाश्रुलोचना॥ स्वागतेनाभिनंद्याथ स्वासने सन्न्यवेशयत्॥६॥ रामलक्ष्मणयोः
सम्यक् पादौ प्रक्षाल्य भक्तितः॥ तज्जलेनाभिषिच्यांगमथार्घ्यादिभिरादृता॥७॥ संपूज्य वि
धिवद्रामं ससौमित्रिं सपर्यया॥ संगृहीतानि दिव्यानि रामार्थं शबरी मुदा॥८॥ फलान्यमृ
तकल्पानि ददौ रामाय भक्तितः॥ पादौ संपूज्य कुसुमैः सुगंधैः सानुलेपनैः॥९॥

॥रामार्थं संगृही

तानि दिव्यानि॥८॥ फलानि रामाय ददावित्यन्वयः॥ तदुक्तं पद्मे शबरी प्रस्कलफम्य प्रणम्यानिवेश्य शुश्र
विष्टरे पादप्रक्षालनं कृत्वा तत्तोयं पापनाशनं शिरसा धार्ययीत्वा च वन्यैः पुष्पैरथार्चयत्॥ फलानि च

सुपक्वानि मूलानि मधुराणि च स्वयमास्वा
द्य माधुर्यं परीक्ष्य च पश्चान्निवेदयामास

राघवाभ्यां दृढव्रता॥ फलान्यास्वाद्य काकु
त्स्थस्तस्यै मुक्तिं परां ददौरिति॥८॥ ॥

१०तेषां शुश्रूषणां कुर्वती अहं सम्यकू उपतेषां समीपे स्थितः॥११॥बहुवर्षसहस्राणि इति पूर्वान्वयि गता
स्ते इसस्य इदानीमित्यादिः गमिष्यतः स्ते त्वमत्रैव समाहिता वसेति मामब्रुवन्॥११॥१३॥आगमिष्यति अत्रा
श्रमे इति शेषः अत एकाग्रं यथा भवति तथा विषयांतरसंचाररहितं मितियावत् तत्ध्याननिष्ठा अत्र

२मे

हृतातिथ्यं रघुश्रेष्ठमुपविष्टं सहानुजं॥ शबरी भक्तिसंपन्ना प्रांजलिर्वाक्यमब्रवीत्॥१०॥अ
त्राश्रमे रघुश्रेष्ठ गुरवो मे महर्षयः॥ स्थिताः शुश्रूषणं तेषां कुर्वती समुपस्थिता॥११॥बहुवर्ष
सहस्राणि गतास्ते ब्रह्मणः पदं॥ गमिष्यतो ब्रुवन्मां त्वं वसात्रैव समाहिता॥१२॥रामो दाशर
थिर्जातः परमात्मा सनातनः॥ राक्षसानां वधार्थाय ऋषीणां रक्षणाय च॥१३॥आगमिष्यति
चैकाग्र ध्याननिष्ठा स्थिरा भव॥ इदानीं चित्रकूटात्त्वाश्रमे वसति प्रभुः॥ यावदागमनं
तस्य तावद्रक्ष कलेवरं॥ [illegible] दृष्ट्वैव राघवं दग्ध्वा देहं यास्यसि तत्पदं॥१५॥तथैवाकरवं राम
त्वद्ध्यानैकपरायणा॥ प्रतीक्ष्यागमनं तेघ सफलं गुरुभाषितं॥१६॥तव संदर्शनं राम गुरूणा
मपि मे न हि॥ योषिन्मूढाप्रमेयात्मन् हीनजातिसमुद्भवा॥१७॥

१स्थिरा भवेत्यर्थः॥ तेषां गमनका
लमाह॥ इदानीमिति॥ इत्युक्त्वा ते गता इत्यर्थः॥१४॥१५॥ ते आगमनं प्रतीक्ष्य स्थिता अहं तथैव यथा गुरुभि
रुक्तं तथा करवं तच्च मे गुरुभाषितं रामोत्रायास्यतीत्येतत्॥ अद्य सफलं जातं॥१६॥हे राम तवैतद्रूपस्य दर्शनं मे

गुरूणामपि न जातं हेऽप्रमेयात्मन् अहं योषि
त् अनेन सर्वधर्मानर्हत्वं तत्रापि हीनजातिसमुद्
भवा हा सतद्दाज्ञोस्त्येवं क्रमेण शतसंख्यात उत्तरं

स्यापि दासीत्वे नाधिकारः साक्षात्तव दास्ये तु सु
तरामनामाधिकारः॥१७॥

१८॥ इति हेतोः योगिनामपि समनोवाक्गोचरस्त्वं मे मयाकथं दृष्ट इति प्रश्नः स्तोतुमित्यादिर्विनयः॥१९॥ पुंस्त्वस्त्री-
त्वकृतो विशेषो वा जातिनामाश्रमादयः तत्कृता विशेषा वा न मद्भजने कारणं किंतु भक्तिरेव न तु पुंसो ब्रह्मण-
स्यैववाधिकार इत्यर्थः॥२०॥ तदेवोपपादयति॥ यज्ञेत्यादि वेदाध्ययनकर्मभिः। वेदाध्यायनेन वेदोक्तकर्मा-

तव दासस्य दासानां शतसंख्योत्तरस्य वा॥ दासीत्वेनाधिकारोस्ति कुतः साक्षात्तवैव हि॥१८॥
कथं रामाद्य मे दृष्टस्त्वं मनोवागगोचरः॥ स्तोतुं न जाने देवेश किं करोमि प्रसीद मे॥१९॥ श्रीराम उ-
वाच॥ पुंस्त्वे स्त्रीत्वे विशेषो वा जातिनामाश्रमादयः॥ न कारणं मद्भजने भक्तिरेव हि कारणं॥२०॥
यज्ञदानतपोभिर्वा वेदाध्ययनकर्मभिः॥ नैव द्रष्टुमहं शक्यो मद्भक्तिविमुखैः सदा॥२१॥ तस्मा-
द्भामिनि संक्षेपाद्वक्ष्येहं भक्तिसाधनं। सतां संगतिरेवात्र साधनं प्रथमं स्मृतं॥२२॥ द्वितीयं
मत्कथालापस्तृतीयं मद्गुणेरणं॥ व्याख्यातृत्वं मद्वचसां चतुर्थं साधनं भवेत्॥२३॥ आ-
चार्योपासनं भद्रे मद्बुध्यामायया सदा॥ पंचमं पुण्यशीलत्वं यमादिनियमादि च॥२४॥ ॥

तु शक्यो नैवेत्यर्थः॥२१॥ मत्कथालापः मच्चरितनिबंधालाप इत्यर्थः मद्गुणेरणं मद्गुणकीर्त्तनं मद्वचसां मत्प्र-
तिपादकवचसां उपनिषद्रूपाणां व्याख्यातृत्वं॥ अमायया अच्छलेन मद्बुध्या ईश्वरबुध्या गुरुसेवा पुण्यशी-
लता पुण्यविषये स्वारसिकी प्रवृत्तिः यमादि अहिंसास्तेयब्रह्मचर्यापरिग्रहा यमाः आदिना आसनप्राणा-

यामप्रत्याहाराः नियमादि शौच संतोष तपः
स्वाध्यायेश्वरप्रणिधाना नियमाः अनादिना धा-
रणाध्यानसमाधयः॥२५॥

मत्पूजने निष्ठा तत्परता मम ये मंत्रास्तदुपासकत्वं तदुपासनं तच्च सांगं तत्तन्मंत्रकल्पोक्तांगसहितं ॥२५॥ अधिका मत्तो
प्यधिकेत्यर्थः पुत्रादारस्य पितुरिव तदादरस्य ममाधिकं संतोषदत्वादिति भावः मन्मतिः। सर्वांतर्यामी भगवानिति
सर्वं भगवद्विवर्त्त इति वा मतिः विरागित्वं वैराग्यं शमोंतरिंद्रियनिग्रहः आ[illegible]माबाह्येंद्रियनिग्रहरूपो दमः ॥२६
ममतत्त्वविचारः। स्वस्य तत्त्वं शुद्धं ब्रह्म तद्विचारः। तत्त्वमस्यादिवाक्यतः ॥२७॥ यस्य कस्य वेत्यस्यैव प्रपंचः। स्त्रिय इ

निष्ठा मत्पूजने नित्यं षष्ठं साधनमीरितं ॥ मम मंत्रोपासकत्वं सांगं सप्तममुच्यते ॥२५॥ मद्भक्तेष्वधि-
का पूजा सर्वभूतेषु मन्मतिः। बाह्यार्थेषु विरागित्वं शमादिसहितं तथा ॥२६॥ अष्टमं नवमं तत्त्ववि-
चारो मम भामिनि ॥ एवं नवविधा भक्तिसाधनं यस्य कस्य वा ॥२७॥ स्त्रियो वा पुरुषस्यापि तिर्यग्यो-
निगतस्य वा ॥ भक्तिः संजायते प्रेमलक्षणा शुभलक्षणे ॥२८॥ भक्तौ संजातमात्रायां मत्तत्त्वानु-
भवस्तदा ॥ ममानुभवसिद्धस्य मुक्तिस्तत्रैव जन्मनि ॥२९॥ स्यात्तत्कारणं भक्तिर्मोक्षस्येति सु-
निश्चितं ॥ प्रथमं साधनं यस्य भवेत्तस्य क्रमेण तु ॥३०॥ भवेत्सर्वं ततो भक्तिर्मुक्तिरेव सुनिश्चितं ॥
यस्मान्मद्भक्तियुक्तात्वं ततोहं त्वामुपस्थितः ॥३१॥

॥तियस्यैतन्नवविधं साधनं जायते तस्य प्रेमलक्षणा
भक्तिः संजायते ममायं भूयात् ॥ भूत्वा च मा नश्यत्वित्सेवमिछा प्रेमः ॥२८॥ मत्तत्वे ब्रह्म अनुभवसिद्धस्येति तृती-
यासमासः मुक्तिः स्यादित्यन्वयः ॥२९॥३०॥ सर्वं नवविधं साधनं ततो भक्तिस्ततो मुक्तिरित्यन्वयः ॥३१॥ ॥

इतो मद्दर्शनात् ॥ अस्मादेव मद्दर्शनादित्यर्थः ॥ ३२ ॥ ३३ ॥ सर्वं जानासीत्यत्र हेतुगर्भं विशेषणं सर्वज्ञेति यस्त्वं छसे त
ल्लोकाननुसृतोसीति जाते इति शेषः ॥ ३४ ॥ ततो यतस्त्वं ल्लोकाननुसृत इत्यर्थः ॥ ३५ ॥ तत्रास्युपायमप्याह तत इति
३६ ॥ भीतभीतः भीतेभ्योपि अतिभीत इत्यर्थः ॥ ३७ ॥ कस्य भयादेवं भीतस्तत्राह ॥ वालिन इति भ्रातुर्वालिनो भयादि

इतो मद्दर्शनान्मुक्तिस्तव नास्त्यत्र संशयः ॥ यदि जानासि मे ब्रूहि सीता कमललोचना ॥ ३२ ॥ कुत्रास्ते
केन वानीता प्रिया मे प्रियदर्शना ॥ ३३ ॥ शबर्युवाच ॥ देव जानोसि सर्वज्ञ सर्वत्वं विश्वभावन ॥ त
थापि पृच्छसे यस्माल्लोकाननुसृतः प्रभो ॥ ३४ ॥ ततोहमभिधास्यामि सीता यत्राधुना स्थिता ॥ रावणे
न हृता सीता लंकायां वर्त्ततेधुना ॥ ३५ ॥ इतः समीपे रामास्ते पंपानाम सरोवरं ॥ ऋष्यमूकगिरिर्ना
म तत्समीपे महानगः ॥ ३६ ॥ चतुर्भिर्मंत्रिभिः सार्द्धं सुग्रीवो वानराधिपः ॥ भीतभीतः सदा तत्र ति
ष्ठत्यतुल्यविक्रमः ॥ ३७ ॥ वालिनश्च भयाद्भ्रातुस्तदगम्यमृषेर्भयात् ॥ वालिनस्तत्र गच्छ त्वं तेन सख्यं
कुरु प्रभो ॥ ३८ ॥ सुग्रीवेण स सर्वं ते कार्यं संपादयिष्यति ॥ अहमग्निं प्रवेक्ष्यामि तवाग्रे रघुनंदन
३९ ॥ मुहूर्त्तं तिष्ठ राजेंद्र यावद्दग्ध्वा कलेवरं ॥ यास्यामि भगवन्राम तव विष्णोः परं पदं ॥ ४० ॥ इति रा
मे समामंत्र्य प्रविवेश हुताशनं ॥ क्षणान्निर्धूय सकलमविद्याकृतबंधनं ॥ ४१ ॥

त्यर्थः ननु तत्र वा
लिन कथमभयमा तत्राह ऋषेर्भयात् तद्वालिनोऽगम्यं एकपद्यचार्थो वाल्मीकिना सविस्तरं दर्शितः अग्रे चात्रा
पि दर्शयिष्यति तेन सुग्रीवेण सख्यं कुरु तस्यापि विपद्ग्रस्तत्वात्तेन सख्यं सुलभं न तु वालिनेति भावः ॥ ३८ ॥ ३९ ॥ वि

ष्णोस्तव परं पदं ब्रह्मलोकं ॥ ४० ॥ अविद्याकृतबं
धने संसारः ॥ ४१ ॥

विशेषो सामान्यमर्प्यतिरंन्पस्पति किमिति श्रीरामे प्रसन्ने किं दुर्लभं तमेव विशेषं सामान्योपपादकत्वेनाह ॥ यदधमजन्माश्चवर्यपि रामे प्रसन्ने मुक्तिमाप ॥ ४२ ॥ मुक्तिं यांतीति किं पुनर्वक्तव्यमित्यन्वयः ॥ यतस्तद्भक्तिर्मुक्तिरेव अनेन रूपकेण सर्वथा तस्या मुक्तिजनकत्वं सूचयति ॥ ४३ ॥ यतो रामचंद्रस्य भक्तिर्मुक्तिदा अतो रामस्य दुघंचरणपद्मयुगलं सेवध्वं तद्विषयेऽत्युत्सुका अस्तुत्कंठेछावंतः सतः नानाप्रकारां अज्ञानविशेषभूतां अज्ञानस्यै

रामप्रसादाच्छबरी मोक्षं प्राप्ताति दुर्लभं ॥ किं दुर्लभं जगन्नाथे श्रीरामे भक्तवत्सले ॥ ४२ ॥ प्रसन्नेऽधमजन्मापि शबरी मुक्तिमापसा ॥ किं पुनर्ब्राह्मणमुख्याः पुण्याः श्रीरामचिंतकाः ॥ मुक्तिं यांतीति तद्भक्तिर्मुक्तिरेव न संशयः ॥ ४३ ॥ भ[illegible]क्तिर्मुक्तिविधायिनी भगवतः श्रीरामचंद्रस्य हे लोकाः कामदुघांघ्रिपद्मयुगलं सेवध्वमत्युत्सुकाः ॥ नानाज्ञानविशेषमंत्रविततिं त्यक्त्वा सुदूरे भृशं रामं श्यामतनुं स्मरारिहृदये भांतं भजध्वं बुधाः ॥ ४४ ॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे आरण्यकांडे दशमः सर्गः ॥ १० ॥

॥ वतन्मूलसंसारस्यैव जनिका मंत्रविततिं मंत्रसमूहं त्यक्त्वा भृशमतिशयेन रामं भजं तु तत्र हेतुगर्भं विशेषणं स्मरादिहृदये भांतं स्मरारिः शिवः ४४ इति श्रीमत्सकलराजविपदुद्धरण समर्थेत्यादिविरुदावलीविराजमानस्य हिम्मतिवर्म्मणः पुत्रस्य श्रीरामवर्मणः कृतावध्यात्मरामायणसेतौ आरण्यकांडे दशमः सर्गः ॥ १० ॥ स० ॥ ॥ ०॥॥॥०॥

अध्यात्मरामायणे आरं[illegible]ण्यकांडे समाप्तं पत्र ३४

```
[OrderDescription]
,CREATED=18.02.20 12:31
,TRANSFERRED=2020/02/18 at 12:41:27
,PAGES=69
,TYPE=STD
,NAME=S0002850
,Book Name=M-2693-ADHYATAM RAMAYAN ARANAYKAND
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
```

```
FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
```

```
FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
```

```
FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,
```